वचनं पूतक्रत्वादयः पुंयोगप्रकरणे वक्तव्याः पूतक्रतोः स्त्री पूतक्रतायी यया हि पूताः क्रतवः पूतक्रतुः सा भवति॥ ॥ ॥

सपूर्वग्रहणेन च पूर्वशब्दस्यावयववाची गृह्यते न तु व्यवस्थावाची। शब्देवयवस्य प्रत्यासन्नत्वात् सामर्थ्याच्च पतिशब्देन तदन्तविधिर्भवति। ग्रहणवतेति तदन्तविधिप्रतिषे
धबाधनात् पूतक्र पूतक्रत्वादीनामिति त्रयणेतेयोगाद्। प्रहिताः पुंयोगादाख्यायामित्यत्रानुवर्त्यन्ते तथा इत्युक्तं भवति। तेन यदा पुंयोगात् स्त्रियां पूतक्रत्वा एप० २५
१दयो वर्तन्ते तदायं विधिर्नान्यदा ॥ ॥ श्री ॥ ॥

=ननु दृढपत्नीत्यादौ समासप्रातिपदिकात्सर्वस्य कस्यचिदभावात्सपूर्वत्वाभावेन नकारो न स्यादत आह· पूर्वशब्दश्चेति· अत एव बाकेनातिप्रसंगः। प्रत्ययविधौ तदन्तविधिप्रतिषेधादाह· सामर्थ्याच्चेति· सपूर्वस्येति विशेषणसामर्थ्यादित्यर्थः। वि=
=द्यमानपूर्वावयवकत्वस्य केवलपतिशब्दे अभावात् नकाररूपावयववस्तु अव्यभिचारादिति तात्पर्यं· [illegible] अनुपसर्जनादित्यपि तदन्तविशेषणं पत्यन्तादनुपसर्जनादिति· १=

लिंगसन्नियोगेनेति लिंगार्थविहितः प्रत्ययो लिंगशब्देनोच्यते। यद्यपि स्त्रीप्रत्ययेन सहागमादेशानां विधानं तथापि विधानोत्तरकालं स्त्रीप्रत्यये लुप्तेऽपि तेषां श्रवणं प्रसज्येत
तान्निवृत्तौ प्रमाणाभावात्। यथा यमलकयोरेकं विनाऽपि विनापरस्य विनाश इति भावः। पञ्चेन्द्राण्य इति तद्धितार्थे द्विगुः सास्य देवतेत्यण्। तस्य द्विगोर्लुगनपत्य
इति लुक्। लुक्तद्धितलुकीति ङीषो लुक्। अत्रानुको निवृत्तिर्न प्राप्नोति पंचाग्निरिति पंचाग्नाय्यो देवता अस्येति पूर्ववत्सर्वं अत्रैकारस्य निवृत्तिर्न प्राप्नोति पंच
भिरिति आग्नायी यष्टकृतस्याद्यर्द्धदृष्टैर्वै तिलुक् ततो ङीपो लुक् अत्ररेफस्य निवृत्तेरप्रसंगः पंचमेनेति नावृति पंचग्रहणमिति लुग्वे सत्रे नावतीत्येन गृह्णाति

लिंगसन्नियोगेन सर्वत्रागमादेशानां वचने लिंगलुकि तत्कृतप्रसंगः लिंगसन्नियोगेन सर्वत्रागमादेशानां वचने लिंगलुकि तत्कृतं प्राप्नोति पं
चेन्द्राण्यो देवता अस्य पंचेन्द्रः पंचाग्निः दशाग्निः किमुच्यते सर्वत्रेति अन्यत्रापि नावश्यमिहैव क्वान्यत्र पंचभिर्धीवरीभिः क्रीतः पंचधीवा दशधीवे
ति लिंगग्रहणेन नार्थः सर्वत्रागमादेशानां लुकि तत्कृतप्रसंग इत्येव इदमपि सिद्धं भवति पंचमेन गृह्णाति पंचकः नैतदस्ति मरुयं पशोः सट
टोग्रहणेऽग्रहीष्यते इदं तर्हि प्रयोजनं षष्ठेन गृह्णाति षट्क इति सिद्धं त्वागमादेशानामंगतः स्त्रीप्रकरणवचनात् सिद्धमेतत् कथं आगमादेशाः
यदिह स्त्रीप्रकरण उच्यंते तेऽंगाधिकारे वक्ष्यामः स्त्रीप्रकरणग्रहणेन नार्थः सिद्धं त्वागमादेशानामंगतो वचनादित्येव इदमपि सिद्धं भवति षष्ठेन गृह्णा

ति लुक्के सुपसंख्यानात् कन्प्रत्ययोरष्टम्ब्लुक् सट्क इति एतेन मट्सहितस्य लुगिसर्थः षट्क इति उरिपरतः पूर्वेमक्रस्थुगागमो ङरि निवृत्तेऽपि निवर्तेत प्रत्यय
लक्षणेन वा प्रसज्येत। ननु कनि पूर्वस्य पदत्वात्संयोगांतस्य लोप इति पुक्लोपो भवति एवं तर्हि चतुर्थेन गृह्णाति चतुष्क इत्युदाहरणं अत्र हि रात्सस्येति नियमात्सु
कः संयोगांतस्य लोप इति नास्ति सिद्धं त्विति स्त्रीप्रकरणे आगमादेशास्तेऽंगतोंऽगाधिकारे वक्ष्या इत्यर्थः। तत्र स्त्रीप्रत्यये परतोंऽगस्य विधीयमाना आगमादेशास्त
ननु लुप्ते न लुमतांगस्येति प्रत्ययलक्षणप्रतिषेधान्न भविष्यंतीति भावः ॥ श्री ॥

=कन्वं नरं गाम्नीः इति न्यायेन
=लुप्तिबहुवचनमेवाश्रयितव्यमिति
=तआह प्रत्ययलक्षणेनेति

=लोकेकविषयिवान्तर्यगादाहः लिंगमपीति ३

भा० कै० ४ पंचपटुरिति यणादेशस्यासांगत्वात्प्रत्ययलक्षणप्रतिषेधाभावः यद्यपि यणादेशः प्रत्ययलक्षणेन भवति तथापि ङीप्रत्ययलुको बहिरंगत्वादसिद्धत्वाद्यणादेशो
२६ ऽन्तरंगो न निवर्त्तेतेति प्रसंगापत्तौ लिंगंसिध्यतीत्यर्थः सन्नियोगशिष्टानामिति लौकिकोयं न्यायः । एकस्मिन्प्रयोजने येषां सहाधिकारस्तत्रान्यतरनिवृत्तावितर
निवृत्तिः । लिंगमविशिष्टं हीति । बिल्वकादिभ्यश्छस्य लुगित्यत्र छस्येति स्थानिनिर्देशात्तस्य हि प्रयोजनं छमात्रस्य लुग्यथा स्यान्न कुको निवृत्तिर्मा भूदिति यदि
चैषा परिभाषा नाभविष्यन्नरान्कुकः नन्यवक्ष्यदिति किं तन्निर्देशेन कथं पंचपटुरिति नहि यणादेशः सन्नियोगशिष्टः एवं तर्ह्यन्तरंगानपि विधीन्बहि

लिंगलुकि वा प्रकृतिप्रत्यापत्तिवचनं अथवा लिंगलुक्येव प्रकृतिप्रत्यापत्तिर्वक्तव्या लिंगग्रहणेन नार्थः लुकि वा प्रकृतिप्रत्यापत्तिवचनमि
त्येव इदमपि सिद्धं भवति षष्ठेन गन्तातिपट्वादिति किं पुनरत्र ज्यायः लुकि प्रत्यापत्तिवचनमित्येव ज्यायः इदमपि सिद्धं भवति पंचभिः प
ट्वीभिः क्रीतः पंचपटुः दशपटुरिति तत्र हि वक्तव्यं न वक्तव्यं सन्नियोगशिष्टानामन्यतरापाये उभयोरप्यभावः तद्यथा देवदत्तय
ज्ञदत्ताभ्यामिदं कर्म कर्त्तव्यं देवदत्तापाये यज्ञदत्तोपि न करोति वर्णादनुदात्तादसितपलितयोः प्रतिषेधो वक्तव्यः असिता पलि
ता छंदसि क्नमेके छंदसि क्नमेके इच्छन्तीति असिक्न्युपसोपधे [redacted] पलिक्नीरिच्छवतयोभवन्ति ॥ ॥ ॥

रंगो लुग्बाधत इत्यत एव यणादेशे लुकि सति निमित्ताभावाद्यण्न भवति न च लुको बहिरंगत्वादसिद्धत्वं नाजानन्तर्ये इत्यसिद्धत्वप्रतिषेधात् इकोय
णचीत्यत्र ह्यचो नन्तर्यमाश्रितं वर्णे छंदसि क्नमिति तस्य स्थान इति बोद्धव्यं अत्र केचिच्छंदसो ग्रहणं प्रयोगदर्शनार्थमिच्छन्ति तेन भाषायामपि क्ना राम०
देशो भवति । गतो गणस्तृणोम सिक्निकानामितिभाष्यकारेणालेनन्नोपन्यस्तमित्ययुक्तमित्याहुः ॥ ॥ श्री ॥०॥ ॥ २६

पिशंगादिति उत्तरसूत्रे गौरादिविधानेऽपि द्विविधः स्वरे विशेषः। पिशंगशब्दो लघावन्ते द्वयोश्च बह्वषो गुरुरिति मध्योदात्तत्वादनुदात्तान्तः जानपदं नीलादिति सर्वस्मिन्नना
च्छादने प्राप्नोतीति वचनं वोतो उत इति वचनाद् द्वचनग्रहणं त्वादेः डीन्नेग्रहणं विशेषणस्यापि तु गुणस्य ग्रहणं प्राप्नोति। यथा पटस्य गुणस्य हि भावादि स्यात्। ततश्च जातसा
दिवचनाद् पिटडीष्प्राप्नोत्याखुरित्यादाविति एष्टव्यति। को गुण इति सत्त्व इति द्रव्यमाश्रयते [redacted] ततः एव च द्रव्यान्निवर्तते भिन्नजातीयेषु दृश्यते यः स गुणः। एतेन
जातेर्गुणत्वं निवारितं। सा हि द्रव्ये निविशमाना द्रव्यं न कदाचिज्जहाति। न च भिन्नजातीयानि द्रव्याण्यभिनिविशते यद्यपि गवाश्वादिषु प्राणित्वमस्ति तथापि प्रा

=इत्युपलक्षणं संज्ञायाः।१=

वर्णान्ङीपविधानेऽपि शंगादुपसंख्यानं। वर्णान्ङीपविधाने पिशंगादुपसंख्यानं कर्तव्यं पिशंगी जानपदकुंड। नीलादोषधौ नीलादोषधावि
ति वक्तव्यं नीली ओषधिः प्राणिनि च प्राणिनि चेति वक्तव्यं नीली गौः नीली वडवा। वा संज्ञायां वा संज्ञायामिति वक्तव्यं नीली नीला वो
तो गुणवचनादिस्युच्यते को गुणो नाम सत्त्वे निविशतेऽपैति पृथग्जातिषु दृश्यते आधेयश्चाक्रियाजश्च॥ ॥ ॥

णित्वेन तेषामेकजातीयत्वमेव क्रियायास्तु पूर्वोक्तलक्षणयोगात् गुणत्वं प्राप्नोति। सापि हि द्रव्ये निविशते कदाचिन्निवर्तते। निष्क्रियं हि द्रव्यं कदाचित् भवति क
दाचित् सक्रियं भिन्नजातीयानि च द्रव्याण्याश्रयतीत्याह आधेय इति उत्साद्योपयाद्यघटादेः पाकजो रूपादिः। अक्रियाजोऽनुत्पाद्योपयाकाशादेर्महत्त्वादिः।
क्रियात् साध्यैवननित्येति तस्याद्विविध्याभावात् गुणत्वाभावः। एवं तु द्रव्यस्यापि गुणत्वं प्राप्नोति अवयवि द्रव्यमवयवद्रव्येषु नि विशते समवायिकारणं संयोग
निवृत्तौ च विनाशात्ततोऽपैति। भिन्नजातीयेषु च हस्तपादादिषु दृश्यते द्विविधं तन्नित्यानित्यभेदेन निरवयवस्य द्रव्यस्यात्मपरमाण्वादेर्नित्यत्वादवयवि द्रव्यस्या

=क्रियातिति। नित्यानित्यव्यक्तिजातिमत्त्वं गुणत्वं नैवं क्रियेति तात्पर्यं।२ =इत्यत आहेत्यर्थः।३=आधेयत्वस्य विवरणं उत्साद्य इति।४=

असत्वप्रकृतिरिति अद्रव्यस्वभाव इत्यर्थः अत्र ष्ठग्जातिषित्यसमासः समासे हि जात्यंतात् छ बंधुनीति छः प्रसज्येत तत्र व्यक्तिषु जात्याधारोपुर दृश्यमानो
जातिषु दृश्यत इत्युच्यते अयमेवार्थः श्लोकांतरेणोच्यते उपैत्यन्यदिति अन्यत् द्रव्यं शुक्लादिको गुण आगच्छत्यन्यत्तु परित्यजति भिन्नजातीयेषु च द्र
व्येषु दृष्टः। सर्वलिंगाश्रयणात् लिंगग्राहित्वाद्वाचकः सर्वलिंगानां शब्दधर्मस्य वाचकत्वस्यार्थेऽध्यारोपात् वाचक इत्युच्यते द्रव्यादन्य इति यथोक्त
=तदापर्यस्य·५ लक्षणयुक्तेपि यस्य द्रव्यत्वं नास्ति स गुण इत्यर्थः वस्वीति धान्येनिर्दिश्यतेनिर्दिशितव्येनेमानेऽप्सरसप्रिन्हीति वसुशब्दस्याद्युदात्तत्वमुत्पादितः तस्मा

सोऽसत्वप्रकृतिर्गुणः अपर आह उपैत्यन्यज्जहात्यन्यद्दृष्टो द्रव्यांतरेष्वपि वाचकः सर्वलिंगानां द्रव्यादन्यो गुणः स्मृतः गुणवचनात्
ङीवाद्युदात्तार्थं गुणवचनात् ङीष्वक्तव्यः किं प्रयोजनं आद्युदात्तार्थं आद्युदात्ताः प्रयोजयंति वस्वीपट्वी खरुसंयोगोपधप्र
तिषेधश्च खरुसंयोगोपधानां च प्रतिषेधो वक्तव्यः खरुरियं ब्राह्मणी पांडुरियं ब्राह्मणी पुंयोगाद्वा॥ ॥ ।॥

नङीपि सति ईकारोऽनुदात्तो भवति ङीपि तु नेदात्तः स्यात् अंतोदात्तानु ङीषङीषोर्विशेषाभावः उदात्तयणो हल्पूर्वादिति ङीष उदात्तत्वविधानात् पुंयो पुंसा
योगः पुंयोगः तस्माद्धेतोर्यत् प्रातिपदिकं स्त्रियां वर्तते तेन ततो ङीष् भवति आख्याग्रहणं गुणभूतेनापि पुंसा संबध्यते अन्येन संबंधासंभवात् गणकादयो =०=
हि शब्दाः पुंयोगात् स्त्रियां वर्तमानानां पुंयोगस्याख्याभवंति स्त्रियां च पुंयोगमंतरेणा न वर्तंत इति स्त्रिया अपि नाख्याः पुंयोगात्तु स्त्रियां वर्तमानानां स्त्री राम०
प्रसाख्यात्वमव्यभिचारान्न विशेषणं पुंविशेषणस्य तु प्रयोजनं प्रजातापसृते सा दोरङीप्रिमृन्निः प्रसूतादयो हि पुंयोगात् स्त्रियां वर्तंते पुमांसं तु नाच २७

=तथा च प्रधानस्य योगे तस्य नाख्यायामिति विशेषणमित्युक्तं नापि स्त्रियामित्यस्य विशेषणमित्याह स्त्रियं चेति अत्र हेतुः किं पुंयोगात्प्राकृतराख्यायामित्यर्थः उतोत्तरकालं नाघ इत्याह न वर्तत इति नांत इत्याह पुंयोगाविति २=
=प्रसूतादयो हीति पुंयोगहेतुकगर्भाधानोत्तरं तन्निःसरणरूपप्रसवप्रवृत्तिनिमित्त[illegible]भावः। एवं च प्रसूतादीनां पुमाख्यत्वाभावान्नैते ङ्योः। विसाख्यायग्रहणस्य प्रयोजनमुक्तं=

गोपालिकादीनामिति सिद्धय इति वाक्यशेषः किं पुनरिति यदि प्रष्ठादिशब्दः पुंसि व्युत्पाद्यते ततः स्त्रीत्वविनिर्देशात् । अथ तत्समर्थो चरणात्प्रस्थानादिक्रियाप्र
निकर्तृत्वमात्रे सति स्त्रियां व्युत्पाद्यते तदा तदंतरंगत्वाद्दापि कृते सुबुत्पत्तौ सत्यां समासे कृते अकारांतत्वाभावात् टाप् न स्यादिति प्रश्नः तस्येदमित्यनेनेति यथा
राज्ञामात्यो राजकार्याणि राजव्यपदेशं च लभते तथा प्रष्ठभार्यापीत्यर्थः । स्वान्तशब्दः करणसाधन इत्युनरुक्तः परिशेषशब्दः तद्धितलुग्वचनमिति तस्येद

=गंधतैलादिवचनस्यार्थः ।१=

प्रयोगगामिति

गोपालिकादीनां प्रतिषेधः गोपालिकादीनां प्रतिषेधो वक्तव्यः गोपालिका पशुपालिका किंपुनरिहोदाहरणं प्रष्ठीभचरी कथं पु
नरयं प्रष्ठशब्दः अकारान्तः स्त्रियां वर्तते तस्येदमित्यनेनाभिसंबंधेन यथैवत्य सौ तत्कृतान्स्वान्नोद्वर्त्ते नपरिशेषकाँल्लभते एवं प्रष्ठशब्द =तस्येदमित्यभिसंबंधलताम्: २=
मपि लभते । यद्येवं पुंयोगादाख्यायां तद्धितलुग्वचनं पुंयोगादाख्यायां तद्धितस्य लुग्वक्तव्यः तस्येदमिति प्राप्नोति न तर्हीदानीमिदं भ
वति प्राष्ठ्य इमाः प्राचर्य इमा इति भवति च विभाषा लुग्वक्तव्यः यदा लुक् तदा प्रष्ठी यद्येवं नार्थो लुका विभाषा तद्धितोत्पत्तिः यदा त
द्धितोत्पत्तिः तदा प्राष्ठी यदा न तद्धितोत्पत्तिः तदा प्रष्ठी एवमपि लुग्वक्तव्यः नह्यन्तरेण तद्धितस्य लुकं पार्थे शब्दो वर्तते यदि पुनस्तस्यामेव
" प्रष्ठशब्दो वर्तते ॥ ॥ ॥

सुपीतिकः

मितिसंबंधस्य भेदनिबंधनत्वात् भेदाश्रय तद्धितोत्पत्तौ सत्यां तस्य लुग्वक्तव्यः लुकि च सति प्रकृतिरेव प्रष्ठशब्दस्तद्धितार्थे स्त्रियमभिधत्त इति प्रष्ठीति दीर्घः षष्ठी स्यादिति
॥ नह्यंतरेणेति तद्धितस्य विकल्पे नोत्पन्नावपि पक्षे वाक्यमेव भवति प्रष्ठस्येयमिति । तत्र च प्रष्ठशब्दः पुंस्येव वर्तते न तु स्त्रियां । तस्मात्तद्दीर्घत्वमसेद्धं तद्धितलु
ग्विधेयस्य सर्थः यदि पुनरिति यथा पंचभिर्हलैः कृषतीति प्रतिविधानात् कर्तृत्वमेवं स्त्रिया अपि प्रष्ठान्नारोहकर्तृत्वं स्याद् देवेतिभावः ॥ ॥ ॥ तार

=तत्समर्थाचरणादित्यर्थः । पंचभिर्हलैर्हर्षणस्येकेनासंभवात् ।९=

=कथंपुनरस्यार्थेनान्यार्थाभिधानमत आह संबंधादिति ॥

भा०कै०४ कथमिति साक्षात्तस्याः क्रियायाः प्रकरणादकर्तृत्वमन्यते यथैवेति साक्षात्पापमकुर्वत्यपि संविधातृत्वात्कर्तृत्वमापद्यते यथा स्वामिदासो
२८ पचत इति स्वामिनः संविधातृत्वात्पक्तृत्वं दासस्य तु साक्षात्तथा स्त्रीपुंसयोः प्रसिद्धात्त्वमित्यर्थः तत्रान्तरंगत्वादिति प्राप्तिपदिकं पूर्वं लिंगमभिदधाति
पश्चात्तस्यैव्यापितितन्निमित्तस्य सुपो बहिरंगत्वमिति भावः सिद्धत्वादिति तस्येदमिति संबंधात्तद्धितलाभं मन्यते यदयमिति अतिहि ङी ष्टि ङीनचाणं
तानङीपङीषोर्विशेषः अजन्तनिवृत्तिस्तो णङीपउदान्तत्वात् येनीकार इति यथाभानोरियमितिवृद्धाच्छः भानवीया अत्रटाबाधनार्थमिदं वचनं स्यात्

कथंपुनस्तस्याम प्रतिष्ठमानायां प्रष्ठशब्दोवर्त्तते यथैव वध्यमावकुर्वतीकिंचित्पापं तत्कृता न्धुबंधनपरिक्लेशं हन्ति एवं प्रष्ठशब्दमपि ल
भते सुबंतसमासवचनाच्चाकारांतानुपपत्तिः सुबंतसमासवचनाच्च अकारांतत्वानोपपद्यते सुबंतानां समासः तत्राऽन्तरंगत्वाद्दाप् टा
प्सुस्लन्नेसमासः स्वाशब्दः समस्येत तत्रपुंयोगाद्दाख्यायामकारांतादिति ईकारेण प्राप्नोति सिद्धं तु स्त्रियाः पुंशब्देनाभिधानात् सिद्धमेतत्
कथंस्त्रियाः पुंशब्देनाभिधानात् स्त्रीपुंशब्देनाकारान्तेनाभिधीयते ननु चोक्तं पुंयोगादाख्यायां तद्धितलुग्वचनमिति नैषदोषः आ
चार्य्यप्रवृत्तिर्ज्ञापयति नानस्तद्धितोत्पत्तिर्भवतीति यदयंपुंयोगादाख्यायामितीकारं शास्ति नैतदस्ति ज्ञापकं अस्ति ह्यन्यदेतस्य वचने प्रयो
जनं येन ङीकारेण स्त्रीप्रत्ययस्तदर्थमेतत्स्यात् यत्र स्त्री आख्यायां ग्रहणं करोति नहि तद्धितान्तमाख्या भवति ॥ ॥ ॥

=ईकारप्राप्तियोग्याइत्यर्थः १९=

नहितद्धितांतमिति नद्धितांतस्य शब्दस्य प्रकृत्यर्थे पुंस्यवर्त्तनादिति भावः तदेवमाख्याग्रहणांतस्येदमिति भेदविवक्षायामपि तद्धितोत्पत्तिमंतरेणाप्र
ष्ठशब्दस्य स्त्रियां वृत्तिं साधुत्वं च ज्ञापयति तेनन केवला प्रकृतिः प्रयोक्तव्येति नियमो न प्रवर्त्तत इत्युक्तं अस्मिन्वाख्यानेन तद्धितस्य निसोवाधकं प्राप्नोतीति एम० २८
॥ सिद्धं तु स्त्रियाः इत्येतत्पक्षान्तराश्रयेण व्याचष्टे ॥ श्री ॥१॥ ॥

=ननु प्रत्ययान्तरेङीपुमादतत्स्य तस्य ... संबंधादिति ... पुंशब्दः स्वार्थपुंयोगात्स्त्रियां वर्त्तत इत्यर्थपरत्वे नादोषात् ॥

=ननु पूर्वव्याख्याने पितृसंबन्धिनाभिसंबन्धस्योक्तेः पक्षभेदो नुपपन्नो उत आह एतत्पूर्वकेणेति ।१=

अथवेति अनेनाभिसंबन्धेनेति एतत्पूर्वकेणासोयमितिसंबन्धेनेति भावः इतरो भेदसंबन्ध एवानेनोक्त इति मत्वाह ननु चेति अयमपीति अभेदाद्भेदस्य निवृत्तत्वात्तद्धितानुत्पत्तिः भेदस्य तु विवक्षायां तद्धितो न निवार्य्यते कथं पुनरिति भिन्नानामभेदाभावादिति प्रश्नः चतुर्भिरिति आरोप्यतेता द्रूप्यं न तु मुख्यमित्यर्थः मञ्चाह संतीति अत्र बालेषु मंचत्वारोपान्मंचशब्दप्रवृत्तिर्हसंतीति पदांतरप्रयोगाद्विज्ञायते जटिनमिति ब्रह्मदत्तधर्म्मलाभात्तद्रू

अथवा पुनरस्त्वतस्येदमित्यनेनाभिसंबन्धेन ननु चोक्तं पुंयोगादाख्यायां तद्धितलुग्वचनमिति नैष दोषः नाव श्यमयमेवाभिसंबन्धो भवति तस्येदमिति अयमप्यभिसंबन्धोस्ति सोयमिति कथं पुनरतस्मिन्स इत्येतद्भवति चतुर्भिः प्रकारैरतस्मिन्स इत्येतद्भवति [redacted] तात्स्थ्यात् ताद्धर्म्यात् तत्सामीप्यात् तत्साहचर्यादिति तात्स्थ्यात्तावत् मंचाहसंतिगिरिर्दह्यते ताद्धर्म्यात् जटिनं यांतं ब्रह्मदत्त इत्याह ब्र ह्मदत्ते यानि कार्याणि जटिन्यपि तानि क्रियंत इत्यतो जटी ब्रह्मदत्त इत्युच्यते तत्सामीप्यात् गंगायां घोषः कूपे गर्गकुलं तत्साहचर्यात् कुं तान्प्रवेशय यष्टीः प्रवेशयेति अथवा पुनरस्तु तस्यामेव प्रष्ठ शब्दः ननु चोक्तं सुबंतसमासवचनाच्चाकारांतानुपपत्तिः नैष दोषः गति कारकोपपदानां कृद्भिः सह समासो भवतीत्येषा परिभाषा कर्त्तव्या का न्येतस्याः परिभाषायाः प्र योजनानि प्रयोजनं क्राद्यल्पाख्यायां ॥ ॥

पारोपः सिंहो माणवको गौर्वाहीक इत्यादाविव पिता द्धर्म्यात्तद्रूप्यारोपात्तच्छब्दप्रवृत्तिः तदुक्तं हरिणा गोत्वानुषंगो वाहीके निमित्तात्कैश्चिदिष्यते अर्थ मात्रं विपर्यस्तं शब्दः स्वार्थे व्यवस्थित इति । इह तु साहचर्यात् द्वियांप्रष्ठत्वारोपः अथवेति संविधात्रीत्वात् प्रस्थाने कर्तृत्वं द्वियाः पुरुषगता या वा प्रस्थानक्रियाया स्तस्या मारोपादिति भावः ॥ ॥

=अन्यत्र विद्यमानमर्थरूपमन्यत्रारोपितमित्यर्थः ।१=स्वार्थे गोत्वे ।१= =गामादिरूपात् ।२=अत्र पक्षे पुंयोगे लुक्स्त्री...पुरुषगतायो...।१=

=पूर्वत्र प्रस्थाना...पुरुषगताया...पितृ...निमित्तमुपादायैवं तथेति मन्तव्ये ।१=

भा०कै०४
२९

अभ्रविलिप्तीति । अभ्रं या हृस्पततीयांतस्य विलिप्ता शब्देन कर्त्तृकरणे कृते ति समासः । ततः करणपूर्वादिति वर्त्तमाने क्तादल्पाख्यायामिति ङीष् न प्राप्नो
ति वचनसामर्थ्यादाबंतादपि भविष्यतीति चेदत इत्यधिकारो बाध्येत । परिभाषा चान्याय्या वक्ष्यंप कर्त्तव्या अपवादवचनात् प्रातिपदिकाधिकारो वा छेत्तत
स्त्ववाक्ये ङीष् प्रसज्येत अभ्रैर्विलिप्ता द्यौरिति व्याघ्रीति व्याङ्पूर्वो जिघ्रतेर्जिघ्रः संज्ञायां प्रतिषेध इति शस्य निषेधादातश्चोपसर्ग इति कप्रत्ययः । तत्र

अभ्रविलिप्ती सूपविलिप्ती । सुबंतानां समासः तत्रांतरंगत्वाद्दाप् टाप्युत्पन्ने समासः । विलिप्ता शब्दः समस्येत तत्र क्तादल्पाख्यायामि
कारणाद्दिति ङीष् न प्राप्नोति जातेर्ङीष्विधाने प्रयोजनं व्याघ्री कच्छपी सुबंतानां समासः तत्रांतरंगत्वाद्दाप् टाप्युत्पन्ने समासः घ्राशब्दः सम
स्येत तत्र जातेरस्त्रीविषयाद्योपधादकारांतादिति ङीष् न प्राप्नोति समासांतस्य णत्वे प्रयोजनं वक्ष्यति प्रातिपदिकान्तस्य णत्वे समासान्तग्रहण
मसमासांतप्रतिषेधार्थमिति तस्मिन् क्रियमाणे माषवापिणी व्रीहिवापिणी सुबंतानां समासः तत्रांतरंगत्वान्नकारांतान्ङीप् ङीप्युत्पन्ने समासः वा
पिनीशब्दः समस्येत तत्र समासांतस्येति णत्वं न प्राप्नोति कृदंता तद्धितेवृद्धिस्वरौ च प्रयोजनं ॥ ॥ ॥ ॥

घ्रशब्दमात्रं जातौ न वर्त्तेत इति टाबेव स्यात् । ङीषस्तु स्तूकण्योरिरवकाशः समासांतग्रहणमिति समासस्य प्रातिपदिकस्य योंऽतो नकारस्तस्य णत्वमित्यर्थः तत्र माषा
न्वपसभीस्ता मितिवकुलमाभीक्ष्ण्य इति णिनौ कृते यदि ङीपि कृते सुबंतेन समासः स्यात् तदा समासस्यांत ईकारो न तु नकार इति णत्वं न स्यात् माषवापिणी इत्या
=स्तेः करणितिमतेऽद्दं २ ९दाबेव तु स्यात् ॥ ॥ ॥ ॥

एम०
२९

= बहिरंगत्वात्। न चैवमुपपदसमासे पदसंस्कारपक्षे प्रत्ययस्य प्रकृतिमात्रापेक्षत्वात् अन्तरङ्गत्वं प्रातिपदिकसंज्ञायाः॥ = स्वरतो वस्तुयावक्रोशीत्यत्र प्रथमं तद्धिते तदन्तेन च समासे सति अन्तोदात्तत्वं स्यात्। समासोत्तरम् अजितादिषु अन्तमिति बोध्यं॥ २ = अयमः। ३ =
समासे सर्वत्र बहिरङ्गत्वात् उपपदविभक्तिः प्रत्ययस्यापि प्रत्ययविधौ तदन्तग्रहणापेक्षत्वात् समासात् तु अन्यप्रातिपदिकविशेषापेक्षत्वं प्रत्ययविशेषत्वात् इति सर्वत्र बहिरङ्गत्वं

सांकूटिनमिति अभिविधौ भाव इनुणिती इनुण् प्रत्ययः तत्र कूटिन्निति सेन स्यात् समासार्थो विभक्तिश्च प्राप्नोति अणि इनुण् इस अण् प्रत्ययश्च। तत्र सार्थिकत्वादन्त रंगत्वादण् प्रत्ययः स्यात्। तत अश्च कूटिन्नित्यस्य वृद्धिः प्राप्ता इति वृद्धिः स्यात्। प्राक् सुबुत्पत्तेः समासेऽन्तरंगत्वात् पूर्वं समासः अण् प्रत्ययो हि प्रातिपदिकविशेषापेक्षत्वात् बहिरंगः तत्र संकूटिन्नित्यस्मात् समासप्रातिपदिकात् अण् प्रत्यये सतीष्टं सिध्यति व्यावक्रोशीति कर्मव्यतिहारे णच् स्त्रियामिति णच् अणचः स्त्रियामञित्यत्र ससाममपीति णच इनुण इति प्रत्ययग्रहणपरिभाषोपस्थानात् कूटिन्नित्यादेरेवावयवात् तद्धितोत्पत्तिप्रसंग इत्यर्थः॥ कृतग्रह

सांकूटिनं। व्यावक्रोशी। अत्रावयवादुत्पत्तिः प्रसज्येत गतिकारकोपपदानां कृद्भिः सह समासो भवतीति न दोषो भवति सतामप्येतत् सां परिभाषायामवयवादुत्पत्तिः प्राप्नोति॥ किंकारणं प्रत्ययग्रहणे यस्मात् तदादेर्ग्रहणं भवतीति कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणं भव तीति संघातादुत्पत्तिर्भविष्यतीति यदि तर्ह्येषा परिभाषास्ति नैतस्याः परिभाषायाः प्रयोजनं भवति एतस्यै वतिदं न सिध्यति किं कार णं॥ अप्रातिपदिकत्वात् कृत्वात् प्रातिपदिकसंज्ञा भविष्यति॥ ॥श्री ॥ ॥७॥ ॥

णाइति कृतग्रहणपरिभाषया प्रसंग्रहणपरिभाषा बाध्यत इत्यर्थः नैतदस्या इति गतिकारकोपपदानामित्यस्याः सांकूटिनमित्यादि न प्रयोजनं अकृत एव समासे कृतग्रहणपरिभाषया संघातात् तद्धितोत्पत्तिर्भविष्यतीति भावः अप्रातिपदिकत्वादिति णचः स्त्रियामञ् अणिनुण इत्यत्र प्रातिपदिकाधिकारा त्समजंतादिनुणंताच्च प्रातिपदिकात् तद्धितो विधीयते। तत्र कृतग्रहणपरिभाषया णञिनुणंतत्वं सिध्यति न तु प्रातिपदिकत्वं तत्र समासग्रहणे न नियमा
र्थेन संघातस्य प्रातिपदिकसंज्ञा निषेधात् संघातात् तद्धितो न स्यादित्यर्थः॥ ॥

ननु चेति कृत्तद्धितसमासाश्चेत्यत्रापि कृत्तद्ग्रहणे परिभाषया सङ्कृष्टिन्निसस्य विनापि प्राकृ सुबुत्सत्तेः समासेन प्रातिपदिकसंज्ञा भविष्यतीति तन्निर्बन्धनं च्वतद्धित इति
भावः मूलके नोपदंशमिति उपपदं शस्तृतीयायामिति णमुल् अत्र यदि सगतिकारकस्य कृदन्तस्य प्रातिपदिकसंज्ञा स्यात्तदा प्रातिपदिकान्तर्वर्तित्वात् सुलुक्
प्रसज्येत। यद्येवं तृतीयाप्रभृतीन्यन्यतरस्यामिति विकल्पेन समासविधानस्य किं प्रयोजनमिति चेत्तदधि उपदंशं भुक्त्वेत्यत्र पक्षे प्रकृतिभावः अन्यथाऽत्र सस
स्मिन्विकल्पविधाने अमैवाव्ययेनेति नित्यसमासः स्यात्। नत्वत्र स्मिन्निससमासयोः फलकृतविशेषो वक्तव्य इति प्रकृतिभावः प्रतिषिद्ध्येत प्रकारक इति
अत्र समुदायस्य प्रातिपदिकसंज्ञायां सत्यां सुबुत्सत्तौ परव्यपदेशो स्तिनत्वत्तरपदव्यपदेशस्तत्र समुदायस्य कृदन्तव्यपदेशेन तदन्तभावात्तेनस्या तत्कृदन्तमुत्तरं भ पदं ५

=कृत्तद्धितेति तरोक्तं विवृणोति· ननु चे= ननु चेदानीं प्रातिपदिकसंज्ञायामप्येतया परिभाषया इह शक्यमुपस्थातुं। नेत्याह इहहि मूलकेनोपदंशं भुङ्क्ते इति वाक्येऽपि लुक् प्रसज्येत स्वरे =प्रसज्येतेति· तत्रारम्भे समासग्रहणं=
=दानीमिति· एतयेति· कृद्ग्रहणाय दि= चेदोषः स्यात् प्रकारकः प्रकरणं गतिकारकोपपदात्कृदन्तमुत्तरपदं प्रकृतिस्वरं भवतीत्येष स्वरो न स्यात् नैष दोषः इहैवत्र प्रातिपदिकसंज्ञे =कृत्तनियमेन परत्वात्कृदन्तत्वप्रयुक्तसं=
=भाषयेत्यर्थः।१= अवयवस्यापि समुदायस्यापि। तत्र अवयवस्य या प्रातिपदिकसंज्ञा तदाश्रयः स्वरो भविष्यति॥ ॥ ॥ =ज्ञाया अव्ययत्वे प्रबाधो वाच्यः। एवं च फ=
=लाभावान्नेतत्सर्वाभावोपस्थितिरत्र=
=त्रेतिभावः।१=

=चाप्यघजित्यादौ·१=

वतीति कारकशब्दस्य प्रकृतिस्वरो न स्यात् वचनं किमर्थमिति चेत् उपपदार्थं स्यात् मा वास्मिन्साद्धौ गतिकारकग्रहणं वृत्तार्थं स्यात्। अथवा वचनस्याप्रतिपादकत्वलक्ष
[redacted]णामप्रामाण्यं स्यात् हे इति गतिकारकपूर्वस्या
पीत्यत्रापि शब्दात्कारकशब्दस्यापि प्रत्ययान्तस्य प्रातिपदिकसंज्ञा प्रकारकशब्दस्यापि समुदायस्येत्यर्थः। तदा प्रयद इति कारकशब्दस्य प्रातिपदिकसंज्ञायां सत्यां ग राम०
तिकारकोपपदानामित्येतदनाश्रयणो सुप्सुपेति समासे कृते· पि ग्रहणात्कारकशब्दस्यापि कृदन्तत्वात् कृत्तरत्वात्स्वरो भविष्यतीत्यर्थः॥ ॥ ॥ ३०

कौंभकारेय इति एतच्चोपलक्षणं सांकूरितं व्याक्रोशीत्यपि न सिध्यति समुदायावयवसन्निधाने द्विर्वचनवत्समुदाय एव प्रकृतित्वेनाश्रयिष्यत इति चेत्सका
रके दोषः स्यात् समुदायस्य ऋदंतत्वेन इंतर्भावात् गतेस्तदाश्रयं स्वरो न स्यात् किंच समुदाये द्विरुक्ते [redacted] ऽवयवा अपि द्विरुक्ता भवंतीति शिष्यरूढ द्विर्वचनेन न
प्रयुज्यते इह तु समुदायाद् उत्पत्तौ तस्यैवांगसंज्ञायां तन्निबंधनानि कार्याणि प्रवर्त्तेते नावयवानामिति अवयवादपि प्रत्ययोत्पत्तिप्रसंगः तत्र कुंभका
रशब्दे यदि कारशब्दस्यापि प्रातिपदिकसंज्ञा समुदायस्यापि गतिकारकोपपदानामित्येतच्च नाश्रीयते तदा कारशब्दात्प्रातिपदिकात् ङीपि कृते
कारीशब्दस्य ङीप्रत्ययांतत्वात् तत एवं किं सति तस्यैवादिवृद्धिः स्यात् ननु चानुपसर्जनादिति सूत्रे प्रधानेनैतद्विधानमिष्यते तत्र कारशब्दांतङी
प्रभविष्यति तत्कथमुक्तं कौंभकारेयो न सिध्यतीति नैष दोषः गतिकारकोपपदानामित्येतद्वचनमत्र प्रदेशे आक्षिप्तं उपस्थितं चास्तु उपपदस्य
[redacted] इहापि तर्हि सांकूटिनं व्याक्रोशी इति द्वेऽत्रापि प्रातिपदिकसंज्ञे अवयवस्यापि समुदायस्यापि तत्रावयवस्यैव
प्रातिपदिकसंज्ञा तदाश्रया ऽवयवादुत्पत्तिः प्रसज्येत अवयवादुत्पत्तौ सत्यां को दोषः कौंभकारेयो न सिध्यति अवयवस्य वृद्धिस्वरौ स्यातां ॥०॥
सुवंतेन सह समासेन भाव्यं तत्रांतरंगत्वात् कारशब्दादेव ङीप् स्यात् सुबुत्पत्तौ सत्यां समासः प्रसज्येत ततश्च कारीशब्दादेव ढक् स्यात् यद्यपि ङीप्रत्यये
तदादिनियमो नास्ति तथापि ङीप्योढक् प्रतिसमुदायाढ्ढकं बाधित्वा यच्च इति परत्वादंतरंगत्वाद्वावयवाढ्ढक् प्रसज्येत न स्यात् स्थितमेतत् कृतद्धितसमासा
श्चेत्यत्र कृद्ग्रहणपरिभाषा नोपतिष्ठते यस्मादप्रत्यय इत्यस्य प्रतिषेधबाधनार्थं तत्र कृद्ग्रहणपरिभाषोपस्थानेऽनुसृतिमूलके नोपदंशमुक्तं इति वा
क्यस्यापि स्यात् तथाच समासग्रहणाद्योनियमः स वाध्येत समीध्ये प्रवादा इति न्यायाच्च अप्रत्यय इत्ययं निषेधः कृद्ग्रहणेन बाध्यते ननु समासग्रहण
कृतो नियमः तत्र परत्वात् समासग्रहणेन गतिकारकपूर्वस्यापि कृदंतस्य वाक्यस्य प्रातिपदिकसंज्ञाया निवर्त्तनाद्यस्मात्के हि हितस्तदादेरेव कृदंतस्य प्रातिप

=अनुपस्थितो प्रमाणं दर्शयति यस्मादिति=…=ङी प्रत्ययांतत्वस्याधिकस्यापेक्षणाद् स्यांतरंगत्वं=

=त्तावेकार्थीभावेनावयवार्थस्यपृथग्भिक्षर्षाभावात्=

=समुदायस्याधिकदृष्टान्तपरिभाषयेनुगंततमतः प्रातिपदिकं इति उज्ज्वलं त्ववयवयवस्यैवेतिभावः=

तस्मादिति गतिकारकोपपदानामित्यस्याः सांकूटिनमित्यादि प्रयोजनमित्यर्थः उभाभ्यामिति सांकूटिनादि परिभाषाद्वयेन सिध्यतिन केवलयान्यतय्
हणपरिभाषयेत्यर्थः ननु चगतिकारकपूर्वस्यापीत्यपिग्रहणात् कूटिन्निसस्यापीनुगंतत्वादण्प्राप्नोति नैषदोषः उभयोरपीनुगंतत्वे प्रातिपदिकत्वे चार्थ
विच्छेदाभावात्स्वयवविच्छेदेप्रमाणाभावात् समुदायादेवोत्पत्तिर्भवति अस्यसां त्वेकतरस्यां परिभाषायामवयवस्यैवेनुगंततत्वात् प्रातिपदिकत्वात्त द्वितोत्पत्तिः प्र
सज्येत् गतिकारकोपपदात्कृदित्यत्र तु गतिकारकयोर्भेदेनोपादानात् निमित्तभावाद्यथासंभवं क्वचित्केवलस्यकृदंतस्य क्वचित्गतिकारकपूर्वस्यग सा

तस्मात्प्रयोजनमेवैतदस्याः परिभाषायाः उभाभ्यांतु खलु सिध्यति अवदातायांतु ङीप्प्रसंगः अवदातायांतु ङीप् प्राप्नोति अ
वदाता ब्राह्मणी वर्णादनुदात्तात्तोपधात्तो न इति नैषवर्णवाची किंतर्हि विशुद्धवाची स्नात इव विशुद्धवाची एवंत्याह ओति य
स्या वदातानि विद्यायोनि श्च कर्म चाएतच्छितं विजानीहि ब्राह्मणाग्र्यस्य लक्षणमिति सूर्यादेवतायां चाब्वक्तव्यः सूर्यस्य
दे ॥ स्त्री सूर्या देवतायां किं सूरी ॥ ॥ ॥

=तदनुकूलसंविधानमपिधात्वर्थइतिभावः=

रित्यउत्तरस्यस्वरोभवतिं तदेवं गतिकारकोपपदानामिति [redacted] वचनात्प्राक् सुबुत्पत्तेः समासे प्रवृत्ते शट्टे कारणान्तः पुंयोगात् प्रस्थानासंगात् पुंस्कृते कप्रस्था
नक्रियायां संविधा ओत्वाद्वाकतेलात्स्त्रियांवर्तते पुंसो वाचकश्चेतिप्रष्ठीसुदाहरणं भवति अवदातायामिति प्राक् सुबुत्पत्तेः समासदर्शने तत्प्रसंगेनात्रे
रमुक्तंवर्णादनुदात्तादित्यत्र तु वक्तव्यं अवदातशब्दोगौरवाचीतिवर्णात्तात्वतिकीर्त्तापिविशुद्धिमुपादायप्रयुज्यते सूरीति सूर्यतिष्येतियलोपः॥ ० ॥

सामर्थ्य [illegible] दि
संघटनं संविधानं

=वर्णांतरं गौरादिरिक्तं तद्यु केपिप्रयोगाज्जेरवाचीत्ययुक्तमितिभावः एवं चगौरेपिविशुद्धिमादायैवबोधइतितात्पर्यं=

=तेनमहत्वोपाध्यभावे न्यायादिति भ्रमो न कार्य इति भावः।१=

इंद्रवरुण महद्धि ममिति । महत्वयोगे हिमारण्ययोः स्त्रीत्वं यवानीति जात्यंतरमेवाभिधीयते दोषस्तु यवत्वजातेरभावे तदाकारानुवृत्तिमात्रमित्याहुः यवनानीति तस्येदमित्यणो बाधकोऽयं ङीष् उपाध्यायेति उपाध्यायस्याप्राप्ते मातुलस्य तु नित्यं प्राप्ते आनुग्विकल्प्यते मुद्गलानीति ङीषो लित्वादानुगाकारस्य लितस्वरः अर्येति केचित्पुंयोग एवेच्छंति अन्येतु स्वार्थेऽपीच्छंति पुंयोगेत्व र्यी क्षत्रियी सैव भवितव्यं क्रीतात् करणपूर्वादिति किमर्थं

इंद्रवरुण हिमारण्ययोर्महत्वे हिमारण्ययोर्महत्व इति वक्तव्यं महद्धिमं हिमानी महदरण्यमरण्यानी यवाद्दोषे यवाद्दोष इति वक्तव्यं दुष्टो यवो यवानी यवनाल्लिप्यां यवनाल्लिप्यामिति वक्तव्यं यवनानी लिपिः उपाध्यायमातुलाभ्यां वा उपाध्यायमातुलाभ्यां वेति वक्तव्यं उपाध्यायी उपाध्यायानी मातुली मातुलानी मुद्गलाच्छंदसि लिच्चेति वक्तव्यं रथीरभून्मुद्गलानी आचार्यादणत्वं च आचार्यादणत्वं चेति वक्तव्यं आचार्यानी अर्यक्षत्रियाभ्यां वा अर्यक्षत्रियाभ्यां वेति वक्तव्यं अर्यी अर्याणी क्षत्रिया क्षत्रियाणी क्रीतात्करणपूर्वात् क्रीतात्करणपूर्वादिति किमर्थं गवाक्रीता अश्वेन क्रीता । करणपूर्वादित्युच्यमानेप्यत्र प्राप्नोति एषोपि क्रीतशब्दः करणपूर्वः । विभक्त्या व्यवहितत्वान्न भविष्यति यदि तर्हि विभक्तिरपि व्यवधायिका भविष्यति मनसाक्रीतीति न सिध्यति एवं तर्हि नैवं विज्ञायते करणं पूर्वमस्मात्क्रीतशब्दात्सोयं करणपूर्वः तस्मात्करणपूर्वात्क्रीतशब्दात् अनुपसर्जनादिति कथं तर्हि ॥ ॥

मिति क्रियमाणेपि करणपूर्वग्रहणे पूर्वशब्दस्य व्यवस्थावाचित्वादनिष्टप्रसंग इति शं इच्छंति विभक्त्येति क्रमोदीनां घोनिका विभक्त्य इति दर्शनेरदमुच्यते अन्यथा विभक्तेः करणाभिधाने व्यवधानाभावः मनसाक्रीतीति मनसः संज्ञायामिति तृतीयाया अलुक् ॥ ॥ ॥

अवयवेन अवयविन आक्षेपादिति भावः

तीर

कारणमस्मिन्निति पूर्ववदेशो ह्यवयवेवचनः समासप्रातिपदिकत्वान्पदार्थे तेन वाक्येऽदीप्तेनभविष्यतीत्यर्थः बहुव्रीहेः इतजातेनेति वाजातइत्यतो ऽन्तोदात्तत्वं वा भवति पाणिगृहीतीति यस्या अग्निसाक्षिपूर्वकं पाणिग्रहणं कृतं सा अभिधीयते प्रवृद्धविलूनीति प्रवृद्धविलूनं यस्याः इति बहुव्रीहिः अपरे तु कर्मधारयं कुर्वन्ति बहुकृतेति बहूनि कृतान्यनयेति बहुव्रीहिः बहोर्नञ्वदुत्तरपदभूम्नीत्यन्तोदात्तत्वं अकृता मुक्ता तेनाव्ययेन सुप्सुपामिति मासजाते त्या

=सचबहुलग्रहणात्कुतूहलतेः पूर्वमेव ९=

कारणमस्मिन् प्रातिपदिके पूर्ववत् इदं कारणपूर्वं तस्मात् कारणपूर्वात् प्रातिपदिकात् क्रीतान्तं दनुपसर्जनादिति बहुव्रीहेश्च अन्तोदात्तेजातप्रतिषेधः अन्तोदात्ते जातस्य प्रतिषेधो वक्तव्यः इतजाता स्तनजाता पाणिगृहीत्यादीनां विशेषे पाणिगृहीत्यादीनां विशेष इति वक्तव्यं पाणिगृहीती भार्या यस्या हि यथाकथंचित्पाणिर्गृह्यते पाणिगृहीता सा भवति बहुलं तणीति वक्तव्यं किमिदं तणीति संज्ञाछन्दसोर्ग्रहणं किंप्रयोजनं प्रवृद्धविलूनाद्यर्थं प्रवृद्धविलूनी प्रवृद्धविलूना अन्तोदात्तात्बहुनञ्सुकालसुखादिपूर्वात् अन्तोदात्तात् अबहुनञ्सुकालसुखादिपूर्वादिति वक्तव्यं बहुबद्धकृता नञ् अकृता सुकृता कालमासजाता संवत्सरजाता सुखादि सुखजाता दुःखजाता

जातिपूर्वाद्वा अपरवाजातिपूर्वादिति वक्तव्यं ॥ ॥ ॥

तौ जातिकालसुखादिभ्य इति सुखादयः सुखादिभ्यः कर्तृवेदनायामिति कपठ्यंगणे पठितास्तु हगृह्यन्ते अपरवेति बहुव्रीहावन्तोदात्तनिमित्तेषु अन्येषु निषिद्धेषु जातिरेवान्तोदात्तनिमित्तं तस्या विशिष्यत इति जातिग्रहणमेवात्र कर्तव्यमित्यर्थः ॥ ॥ ॥ एम०
३२

कुल... (struck through)
अतीत इति नात्र टाप् स्यादिति नशंको वि॰

=अद्रवमित्यनेन रुधिरादिव्यावृत्तिः। नन्वेवमद्रवमिति व्यर्थं स्यादत आह। अथ वेति। आकाशादेरमूर्त्तस्य वारणाय सर्वेति। अविद्यमानपरिमाणमित्यर्थः। अविकारजमित्यनेन शोफादिव्यावृत्तिः॥ =१

स्वाङ्गाच्चो किं स्वाङ्गमिति किं स्वमङ्गं स्वाङ्गमाहोस्वित्स्वलक्षणान्तरयुक्तमिति प्रश्नः। अद्रवमिति द्रवतीति द्रवं ततोऽन्यदद्रवं मूर्त्तिः काठिन्यं अथ वा सर्वगतद्रव्यप रिमाणं सा यस्यास्ति तन्मूर्त्तिमत् अविकारजमिति विकारो वातादिवैषम्यं तस्माद्यन्न जातमित्यर्थः। तथा अप्राणिस्थमपि संप्रति यत्पूर्वं प्राणिनि दृ ष्टं तदपि स्वाङ्गं यथा रथ्यापतिताः केशाः तस्य चेदिति अप्राणिनोऽपि मुखं स्वाङ्गं भवति यदि यथा प्राणिनां तत्संबद्धं तथैवाप्राणिनामपि अप्राणिनो स॰

स्वाङ्गाच्चोप स्वाङ्गाच्चोपसर्जनादित्युच्यते किं स्वाङ्गं नाम अद्रवं मूर्त्तिमत्स्वाङ्गं प्राणिस्थमविकारजं अतत्स्थं तत्र दृष्टं च तस्य चेत्तत्तथायुतं अप्राणिनोऽपि स्वाङ्गं अद्रवमिति किमर्थं बहुलोहिता नैतदस्ति बह्वचो नेति प्रतिषेधो भविष्यति इदं तर्हि बहुकफा मूर्त्तिमदिति किम र्थं बहुबुद्धिः बहुमनाः नैतदस्ति। अत इति वर्त्तते इदं तर्हि बहुज्ञाना प्राणिस्थमिति किमर्थं स्लक्ष्णमुखा शाला अविकारजमि ति किमर्थं बहुगडुः बहुपिटका नैतदस्ति इहतावत्बहुगडुरिति अत इति वर्त्तते बहुपिटकेति बह्वचो नेति प्रतिषेधो भविष्यति इदं तर्हि बहुशोफा अतत्स्थं तत्र दृष्टं च अप्राणिस्थं प्राणिनि दृष्टं स्वाङ्गसंज्ञं भवति दीर्घकेशी रथ्येति तस्य चेत्तत्तथायुतं अप्राणिनोऽपि स्वा ङ्गसंज्ञं भवतीति दीर्घनासिकी अर्चा तुङ्गनासिकी अर्चेति अथ उपसर्जनग्रहणं किमर्थं इह माभूत् शिखा उपसर्जनग्रहणमनर्थकं

१ बहुव्रीह्यधिकारात् उपसर्जनग्रहणमनर्थकं किं कारणं बहुव्रीह्यधिकारात्॥ ॥

पीति तस्य चेत्तत्तथायुतमित्यस्यसामर्थ्यलभ्योऽयमाहारः। बहुलोहितेति लोहितं रुधिरमुच्यते नैतदस्तीति ङीषभावार्थं लोहितस्य स्वाङ्गत्वप्रतिपाद नं नोपयुज्यते स्वाङ्गे ध्रुवे उपसर्गात्स्वाङ्गं ध्रुवमपर्श्विति सादिकार्याभावार्थं तूपयुज्यत एव॥ ॥ ॥

=नतु कथमुपसर्जनग्रहणे सत्यनंतोदात्तादी प्रसिद्धिरत आह बहुव्रीहेरिति ॥२॥=

भा०कै०४ अस्तित्वेदानीमिति अनेकपदावयवत्वात् खट्वकृतं बहुव्रीहेर्न संभवति । तत्र विधिसामर्थ्याद् बहुच्ग्रहणमुत्तरपदविशेषणं भविष्यतीति मत्वा प्रश्नः स्वरेति

३३ अङ्गेदंष्ट्रिकावयवविशेषः अनंतोदात्तार्थे इति बहुव्रीह्यधिकारात् स्वांगस्योपसर्जनत्वेत्वं पुनरुपसर्जनग्रहणमुपसर्जनमात्रपरिग्रहार्थमि

बहुव्रीहेरितिवर्त्तते कृपकृतं बहुव्रीहेः स्वांतोदात्तादिति बहुजर्थेनत्स्योपसर्जनग्रहणं कर्तव्यं बहुचोनेति प्रतिषेधं वक्ष्यति तद्बहुज्ग्र

=तेनमुखुरवीसादोपघोचेनतिषे= हणमुपसर्जनविशेषणं यथा विज्ञायेत बहुचउपसर्जनान्नेति अपाक्रियमाणउपसर्जनग्रहणे कस्य बहुज्ग्रहणं विशेषणं स्यात्

=धर्दतिमावः॥२= बहुव्रीहेरितिवर्त्तते बहुव्रीहिविशेषणं विज्ञायेत अस्तिचेदानीं कश्चिदबहुज्बहुव्रीहिर्यदर्थो विधिः स्यात् अस्तीत्याह स्वङ्गस्वङ्गी

ति बहुजर्थमिति चेत् स्वांगग्रहणात् सिद्धं स्वांगग्रहणं क्रियते तद्बहुज्ग्रहणेन विशेषयिष्यामः स्वांगाद्बहुचोनेति एवं तर्हि तोदा

त्तादितिवर्त्तते अनंतोदात्तार्थः अनंतोदात्तार्थमुपसर्जनग्रहणं क्रियते अनंतोदात्तार्थमिति चेत् सहादिरूतत्वात्सिद्धं यदयं सहनञ्

विद्यमानपूर्वाच्चेति प्रतिषेधं शास्ति तज्ज्ञापयत्याचार्यः अनंतोदात्तादपि भवतीति स्वांगसमुदा प्रतिषेधार्थं तु स्वांगसमुदायप्रतिषेधार्थं

तर्ह्युपसर्जनग्रहणं कर्तव्यं स्वांगाद्यथा स्यात् स्वांगसमुदायान्मा भूत् ॥ ॥ ॥

सनंतोदात्तादपि ङीष् भविष्यतीति भावः सहादिरूतत्वादिति सहादीनां हलतः [redacted] प्रतिषेधः तद्भावः सहादिरूतत्वं तस्मादित्यर्थः सहादिस्वे रा०भा०

सबहुव्रीहेः पूर्वपदप्रकृतिस्वरे शेषनिघातेच नास्त्यंतोदात्तत्वमिति प्रतिषेधं न विदध्यादिति भावः ॥ ॥ ॥ ॥ ३३

=एवंचोपसर्जनग्रहणाद्बहुव्रीहेरित्यस्य निवर्त्तनान्नस्याप्रसक्तिर्योगविभागश्च स्यांतोदात्तादित्यस्यापि निरस्त्रिरियतिकेशी चंद्रमुखी सादौ सर्वत्र ङीष् सिध्यति अन्यथा यत्र बहुव्रीहौ मुखं स्वांगमित्यादिनांतोदात्तत्वं न तत्र बस्यादीर्घकेशी सादौ न स्यादिति भावः॥२=

=बाहीति इदं च सहाद्युदाहरणाभिप्रायं नञ्पूर्वस्य नञ्सुभ्यामित्यनेन विद्यमानमुखेत्यादौ मुखं स्वांगमित्यनेन … बहुव्रीहौ … तु मुखं स्वांगमिति नास्तीत्यत्र येति निषेधात्॥१=

कल्याणपाणिपादेति पाणी च पादौ च पाणिपादं तत्कल्याणं यस्याः इति बहुव्रीहिः अत्र पाणिपादशब्द उपसर्जनं स च स्वाङ्गसमुदायवाची ननु स्वाङ्गवा
ची यस्तु स्वाङ्गवाची पादशब्दः स उपसर्जनं न भवतीति ङीष् न भवति अस्ति उपसर्जनग्रहणे पादशब्देन स्वाङ्गवाचिना स्वाङ्गान्तो बहुव्रीहिर्भवती

कल्याणपाणिपादा अथ क्रियमाणेऽप्युपसर्जनग्रहणे कस्मादेवात्र न भवति स्वाङ्गं ह्येतदुपसर्जनं न स्वाङ्गसमुदायः स्वाङ्गग्रहणेन गृ
ह्यते यथा न जनपदसमुदायो जनपदग्रहणेन गृह्यते काशिकोशलीया इति जनपदतदवध्योरिति वुञ् भवति एतदपि नास्ति प्रयोज
नं अस्वाङ्गपूर्वपदाद्वेति वचनेन। तेन स्वाङ्गं विशेषयिष्यामः अस्वाङ्गपूर्वपदात्परं यत्स्वाङ्गं तदन्तात् बहुव्रीहेरिति यच्चात्रा स्वाङ्गपूर्वपदा
त्परं न तदन्तो बहुव्रीहिः यदन्तश्च बहुव्रीहिर्नासौ अस्वाङ्गपूर्वपदात्परं स्वाङ्गं ननु च तत्पूर्वस्मिन्योगे बहुव्रीहिविशेषणेनेत्याह पू =अस्वाङ्गपूर्वपदाद्वेति बहुव्रीहिरि =शिभावः।४=
र्वपदविशेषणं तत् नस्वाङ्गमस्वाङ्गमस्वाङ्गपूर्वपदं अस्वाङ्गपूर्वपदमस्वाङ्गपूर्वपदादिति यद्येवं पूर्वस्मिन्योगे बहुव्रीहिरविशेषितो भ
वति बहुव्रीहिश्च विशेषितः कथं क्तादिति वचनेन बहुव्रीहिं विशेषयिष्यामः अस्वाङ्गात्पूर्वपदात्परं यत् क्तान्तं तदन्ताद्बहुव्रीहेरि
ति इदं तर्हि प्रयोजनं। बहुव्रीहेरिति वर्तमाने उपसर्जनमात्राद्यथा स्यात् निष्केशी यूका अतिकेशी मालेति॥ ०॥

तिङीष्स्यात् काशिकोशलीया इति काशयश्च कोशलाश्चेति द्वन्द्वस्तत्र भवा इत्यर्थे वृद्धादपीति वुञ् न भवति। वृद्धिलक्षणश्छ एव भवति नस्वाङ्गमिति
पर्युदासाश्रयेणात्तत्सदृशं शरीरावयवमर्थान्तरवाचि गृह्यत इत्यर्थः निष्केशीति केशेभ्यो निष्क्रान्तेति प्रादिसमासस्तत्पुरुषः॥ ॥ ॥

=ननु पर्युदासेन स्वाङ्गभिन्नस्य प्राणिस्थवाचकस्यैव ग्रहणं स्यात्तत आह-अर्थान्तरमिति-शब्दत्वेनैव साम्यं ग्रहणे इत्यर्थः।१=

नासिकोदरौष्ठ कबरपुच्छीति कबरशब्देन वर्णविशेषोऽभिधीयते। विधिप्रतिषेधयोरिति विधिरुत्सर्गः प्रतिषेधस्त्वपवाद इति तुल्यबलत्वाभावादस्या
अप्राप्तेः सहादिलक्षणो नैव प्रतिषेधेन भाव्यमित्यर्थः। न मद्रूनामिति मृदुभिः कार्प्पासैः कृतः पटो मृदुरेव भवति अयं तु विधिः प्रतिषेधापवाद

नासिको नासिकादीनां विभाषायां पुच्छाच्च नासिकादीनां विभाषायां पुच्छाच्चेति कृते कल्याणपुच्छी कल्याणपुच्छा कबरमणिविष
शरेभ्यो नित्यं कबरमणिविशषरेभ्यो नित्यमिति वक्तव्यं कबरपुच्छी मणिपुच्छी विषपुच्छी शरपुच्छी उपमानात्पक्षाच्च पुच्छाच्च उप
मानात्पक्षात्पुच्छाच्चेति वक्तव्यं उलूकपक्षी शाला उलूकपुच्छी सेनेति नासिकादिभ्यो विभाषायाः सहनञ्विद्यमानपूर्वेभ्यः
प्रतिषेधो विप्रतिषेधेन नासिकादिकादिभ्यो विभाषायाः सहनञ्विद्यमानपूर्वेभ्यः प्रतिषेधो भवति विप्रतिषेधेन नासिकादिभ्यो विभा
अ५ षाया अवकाशः कल्याणनासिकी कल्याणनासिका सहनञ्विद्यमानापूर्वलक्षणस्य प्रतिषेधस्यावकाशः समुखा अमुखा विद्यमान
मुखेति इहोभयं प्राप्नोति। सनासिका अनासिका विद्यमाननासिकेति सहनञ्विद्यमानपूर्वेभ्यः प्रतिषेधो भवति विप्रतिषेधेन। नै
[redacted] वयुक्तो विप्रतिषेधः अयं विधिः प्रतिषेधः विधिप्रतिषेधयोश्च अयुक्तो विप्रतिषेधः अयमपि विधिर्न मृदूनामिव कार्या
सीनो कृतः प्रतिषेधविषय आरभ्यते। स यथैव बहुज्लक्षणं संयोगोपधलक्षणं प्रतिषेधं बाधते एवं सहनञ्विद्यमानलक्षणमपि
॥ बाधेत कान्तर्हि गतिः॥ ॥ ॥ ॥

वादत्वात् बलवानित्यर्थः। कान्तर्हीति विधेरपि बलवत्त्वे विप्रतिषेधाभाव इति मन्यते। इदानीं यथा विप्रतिषेधोपपत्तिस्तथा दर्शयति॥ ० ॥

=सर्वप्रतिषेधकत्वात्=

इहनावदिति दिक्पूर्व्व अन्यत्रापीति यत्रापिप्रतिषिद्धो ङीषित्यर्थः असंयोगोपधादित्यादिकस्य प्रतिषेधोनंतरस्यविधिर्बाधो भवति प्रतिषेधो वेति ङीषएव भवतिनानेनविधीयमानस्य ङीपो लभ्यत इतिभावः एवमपीति वेत्यनुवर्त्तनादिकल्पेन ङीब्विधीयते पक्षे प्राप्नुवतस्य पियप्यासात्। तत्र ङीपामुक्ते पक्षे ङीषि

इहनावन्नासिकोदर इतिबह्वज्लक्षणस्य प्रतिषेधः प्राप्नोति। सहनञ्विद्यमानपूर्वलक्षणस्य पुरस्तादपवादान्अनंतरान्विधीन् बाधंत इति। एवमियं विभाषाबह्वज्लक्षणं प्रतिषेधं बाधिष्यते सहनञ्विद्यमानलक्षणं नबाधिष्यते अोष्ठजंघादंतकर्णश्रृंगाच्चेतिसंयोगोपधलक्षणस्य प्रतिषेधः प्राप्नोति सहनञ्विद्यमानपूर्वलक्षणस्य मध्येपवादाःपूर्वान्विधीन्बाधंत इति। एवमियं विभाषासं
५४ योगोपधलक्षणं प्रतिषेधं बाधिष्यते सहनञ्विद्यमानपूर्वं नबाधिष्यते दिक्पूर्वेदिक्पूर्वपदान्ङीषोनुदात्तत्वं दिक्पूर्वपदात्ङीष अनुदात्तत्वं
५५ वक्तव्यं प्राङ्मुखी ङीब्विधानेन्यत्रापि ङीषियात ङीपः प्रसंगःप्राग्लक्ष्य प्रत्ययस्वरलात्। ननु चैते विशेषा अनुवर्त्तेरन् नसंयोगोप
धाद्बहुचो नेति यद्यप्येतेविशेषानुवर्त्तेरन्नसंयोगोपधाद्बहुचोनेति एवमपि दिक्पूर्वपदान्ङीपामुक्ते ङीष्प्रसज्येत नैषदोषः उक्त
मेतत् यत्रोत्सर्गापवादं विभाषातत्रापवादेनमुक्ते उत्सर्गोनभवतिअथवाङीष आदेशो ङीप्करिष्यते। तर्हि ङीषो ग्रहणंकर्त्तव्यं
नकर्त्तव्यं प्रकृतमनुवर्त्तते क्वप्रकृतेअन्यतोङीषिति तद्वैप्रथमानिर्दिष्टं षष्ठीनिर्दिष्टेन चेहार्थः दिक्पूर्वपदादिसेषा पंचमी ङी
षितिप्रथमायाः षष्ठी प्रकल्पयिष्यति तस्मादित्युत्तरस्येति प्रत्ययविधिरयं नचप्रत्ययविधौ पंचम्यः प्रकल्पिकाभवंतिनायं प्रत्यय
विधिः विहितप्रत्ययः प्रकृतश्चानुवर्त्तते जातेरस्त्री जातेरित्युच्यते काजातिर्नाम॥ ०॥
षप्राप्नोतीत्यर्थः उक्तमिति पारेमध्येषष्ठ्यावेत्यादौ। ततश्च ङीपामुक्ते टाबेवभविष्यतीतिनार्थः सूत्रभंगेनेत्यर्थः जातेरस्त्री काजातिरिति लक्षणावि ॥

भा०कै०४
३५

आकृतिग्रहणेति गृह्यते नेनेति ग्रहणमिति करणसामान्ये पदं संक्रियते तत्राकृतिशब्दसन्निधानेन स्त्रीत्वप्रतिपत्तिर्विहिंगत्वात् स्त्रीप्रत्ययनिमित्तं न भवति आकृतिर्ग्रहणं यस्याः साकृतिग्रहणा । दृष्टव्यसन्निवेशविशेषव्यंग्येत्यर्थः एतेन गोत्वादि जातिर्लक्षिता । ब्राह्मणत्वादि स्तन संगृहीता ब्राह्मणक्षत्रियादीनां संस्थानस्य सदृशत्वादितित तत्संग्रहायाह लिंगानामिति लिंगानि सर्वाणि भजतीति सर्वे शब्दस्य लिंगापेक्षत्वेपि गमकत्वात्समासो विशिष्टि एव समयः । लिंगानामिति कर्मणि षष्ठी । अप्राप्तप्रापणार्थं चेदं वचनमिति तटादेः सर्वलिंगत्वे प्याकृतिग्रहणत्वात् जातिरूपोपपत्तिः । उपदे

आकृतिग्रहणा जातिर्लिंगानां च न सर्वभाक् । सकृदाख्यातनिर्ग्राह्या गोत्रं च चरणैः सह ॥ अपर आह प्रादुर्भावविनाशाभ्यां सत्वस्य युगपद्गुणैः । असर्वलिंगां बह्वर्थां तां जातिं कवयो विदुः । गोत्रं च ॥ श्री श्री ॥१०॥

शापेक्षं च लिंगानामिति जातिलक्षणमिति ब्राह्मणत्वादिरेव लक्ष्यते । तेन देवदत्तत्वस्य सर्वलिंगत्वेपि जातिलक्षणाद्दीषभावः सकृदिति अयं गौरितिसकृदुपदिष्टा जातिर्निर्ग्रहीतुं निःशेषं तु पिंडान्तरे शक्येत्यर्थः गोत्रमितिअपत्यमित्यर्थः । चरणशब्देन शाखाध्यायिनो गृह्यते । गोत्रस्य सर्वलिंगत्वात् पृथगुपादानं नाडायनेन संततकमिति दर्शनात् प्रादुर्भावेति सत्वस्य द्रव्यस्य प्रादुर्भावविनाशाभ्यां आविर्भावतिरोभावौ प्राप्नोति यावद्द्रव्यभाविनीत्यर्थः । गुणैर्युगपद्रूपेण संबध्यते यथा निर्गुणस्य द्रव्यस्योपलंभो न भवत्येवं जातिरपि हि तस्यापीत्यर्थः बह्वर्थामिति सर्वेष्वपि
१ नीमित्यर्थः अर्थशब्दोऽत्र विषयवाची ॥ ४१ ॥

पृ० ३५

=चरणानीति नपुंसकत्वोपपत्तये आह: चरणेति ॰ १ =

ति२

चरणानीति चरणशब्दोध्ययनवचन इह तूपचारात्तद्योगात् पुरुषेष्वेते कुमारी भार्य इति कौमारमयावद्द्रव्यभाव्यत्वादाकृतिग्रहणत्वात् जातिरिति जाते स्त्रीविषयत्वात् पुंवद्भाव प्रतिषेधः। उत्तरेलक्षणे कौमारं जातिर्न भवत्ययावद्द्रव्यभावित्वात् पूर्वोक्तमेव लक्षणं भाष्यकारेणमतं अपर आह सन्निधानादिसाहुः तथा च युवतिरित्युदाहरणं दर्शनसिला दिष्विति प्राप्तस्य पुंवद्भावस्य जाते स्त्रीति निषेधात् अयेतियदास्त्रीविषयोऽस्मिन्नर्थे प्रवृत्तिनिमित्तं तदस्य पदार्थः प्रवृत्तिनिमित्तमा

चरणानि च कः पुनरेतयोर्जातिलक्षणयोर्विशेषः यथा पूर्वं जातिलक्षणं तथा कुमारी भार्येति भवितव्यं यथोत्तरं तथा कुमारभार्य इति भवितव्यं अथा स्त्रीविषयादिति कथमिदं विज्ञायते समानायामाकृतौ परस्त्रीविषयमिति आहोस्वित्क्वचिद्यदस्त्रीविषयमिति किं चातः यदि विज्ञायते समानायामाकृतौ यदस्त्रीविषयमिति। द्रोणीकुटीपात्रीन सिध्यति अथ विज्ञायते क्वचिद्यदस्त्रीविषयमिति मालाबलाका अत्रापि प्राप्नोति अस्तु क्वचिद्यदस्त्रीविषयमिति [redacted] कथं मालाबलाकेति अजादिषु पाठः करिष्यते अयोपधादिति किमर्थम्। इभ्या। क्षत्रिया अत्यल्पमिदमुच्यते अयोपधादिति अकोपधादिति वक्तव्यं इहापि यथा स्यात् चटकामूषिकेति यद्यकोपधादिरुच्यते काकीकोकी। पिकीमुकी।ति न सिध्यति अस्तु तर्ह्ययोपधादित्येव कथं चटकामूषिकेति अजादिषु पाठः कर्तव्यः॥ ॥ ॥

=स्त्रीविषयार्थपठिष्यमाणपाकक =र्णेतिसंज्ञत्वात्कार्यमिसाराणय:।३=

श्रीयतेतरासमानायामाकृतावस्त्रीविषयादित्येष पक्षो भवति। पदानुप्रातिपदिकमन्यपदार्थत्वेनाश्रीयते तदा यत्र क्वचिदस्त्रीविषयादित्येष पक्षः संपद्यते द्रोणीति द्रोणशब्दः परिमाणविशेषे पुल्लिंगो गवादन्यांतु स्त्रीलिंगः मालेति मलतेर्मालइति पुल्लिंगः क्षेत्रविशेषे नपुंसकं। बलपाका यतीति बलाकशब्दो यौगिकः पुंसि दृश्यते अस्त्विति अन्य एव क्रियावाची जातिशब्दस्त्वन्य एवेति परिहारान्तरमप्यत्रसंभवति॥ ॥ ॥

=एवंकुटशब्दोगेहेस्त्रीलिंगः घटेपुमान् पात्रशब्दोभाजनसामान्ये ... विशेषेस्त्री।२=

भा०कै०४ गवयीति गौरादिष्विदानीं तनैर्गवयादयः प्रक्षिप्ता इति वार्त्तिकारंभे ज्ञायते पाककर्ण सदक्काएरेति अत्राप्युक्तिः किं त्वं तो गत्यने अयमप्यजादिषु पाठइ
३६ दानीतनः त्रिफलेति त्रयाणां फलानां समाहार इति द्विगुः ततो द्विगुलक्षणात् ङीपः परत्वात् ङीषा प्राप्तो निषिध्यते तन्निषेधसामर्थ्यान्नत्र ङीबपि न भवति तयो

मुकय१

योपधप्रतिषेधे गवयहयमुकयमनुष्यमत्स्यानामप्रतिषेधः योपधप्रतिषेधे गवयहयमुकयमनुष्यमत्स्यानामप्रतिषेधो भवतीति वक्तव्यं ग
वयी गवया हयी हया मुकयी मुकया मनुषी मनुष्या मत्सी मत्स्या पाककर्ण सदक्काएरुप्रांत शतैकेभ्यः पुष्पात् सदक्कांडप्रांतशतैकेभ्यः
पुष्पात्प्रतिषेधो वक्तव्यः सत्पुष्पा प्राक्पुष्पा कांडपुष्पा। प्रांतपुष्पा शतपुष्पा एकपुष्पा संभस्त्राजिनशणपिंडेभ्यः फलात् संभस्त्रा
जिनशणपिंडेभ्यः फलात्प्रतिषेधो वक्तव्यः संफला भस्त्राभस्त्राफला भस्त्राअजिनः अजिनफला अजिनपिंडफला पिंडशण
ण। शणफला श्वेताच्च श्वेताच्चेति वक्तव्यं श्वेतफला त्रेश्च त्रेश्च प्रतिषेधो वक्तव्यः त्रिफला मूलान्नञः मूलान्नञः प्रतिषेधो वक्त
व्यः अमूला इतोम जातेरिति वर्तमाने पुनर्जातिग्रहणं किमर्थं अयोपधादिति वर्तते योपधादपि यथास्यात् औदमेयी इ
तोमनुष्यजातेरितीञ उपसंख्यानं इतो मनुष्यजातेरितीञ उपसंख्यानं कर्तव्यं सौतंगमी मौनिचिती॥ ॥ ॥

रत्र विशेषाभावात् इतो म औदमेयीति उदमेयस्यापत्यम् अत इञ् सौतंगमीति सुतंगमेन निर्वृत्तेति वुञ्छणादिसूत्रेण इञ्॥ ॥छ॥ ॥ एाम०
॥ श्री ॥श्री ॥ ॥श्री ॥श्री ३६

= द्विगुसमासस्यांतोदात्तत्वेन ङीपुषान्त निवृत्तिस्वरेऽपि विप्रत्ययस्वरे वा विशेषाभावादित्यर्थः।१२

उङुतः यवाग्वेति वर्णग्रहणे अर्थवद्ग्रहणपरिभाषा नोपतिष्ठत इति भावः गोस्त्रियोरिति एकादेशस्यान्तादिवद्भावात् उपसर्जनान्तं प्रातिपदिकं स्त्रीप्रत्ययान्तं भव
तीति भावः नद्यृत इति नद्यन्तो बहुव्रीहिर्भवतीति भावः दीर्घोच्चारणे तु तत्सामर्थ्यान्न कप् ह्रस्वौ न प्रवर्त्तेते उभयत इति एकादेशस्यान्तवत्त्वेन प्रातिपदिकसंज्ञा
संपाद्याऽन्यथा प्रत्यय इति प्रतिषेधप्रसङ्गः आदिवत्त्वेन च स्त्रीप्रत्ययत्वं सम्पद्य मित्येकोऽवयवो युगपद्द्वयोरिस्थावुभौ विरोधान्न प्रवर्त्तेते स्त्रीप्रत्ययविधे

=स्वयं प्रतिपादयन् तस्मात् =स्त्रीप्रत्यये कि २= स्त्रीप्रत्ययान्त.विशेषणमित्यर्थः

उङुतः किमर्थोऽङ्कारः । विशेषणार्थः । किं विशेषणार्थेनार्थः नोङ्धात्वोरिति नोधात्वोरित्युच्यमाने यवाग्वा यवाग्वै इत्यत्रापि प्रसज्येत अथ
दीर्घोच्चारणं किमर्थं न उङुतः इत्येवोच्येत का रूपसिद्धिः ब्रह्मबन्धूः वीरबन्धूरिति सवर्णदीर्घत्वेन सिद्धं नेति ध्यातिगोस्त्रियोरुपसर्जनस्येति ह्रस्व
त्वं प्रसज्येत इह च ब्रह्मबन्धूच्छत्रं ब्रह्मबन्धुच्छत्रं षत्वतुकोरसिद्ध इत्येकादेशस्यासिद्धत्वान्नित्यस्तुक् प्रसज्येत इह च ब्रह्मबन्धूः वीरबन्धूः नद्य
त इति कप् प्रसज्येत नैष दोषः यत्तावदुच्यते ब्रह्मबन्धूः वीरबन्धूरिति गोस्त्रियोरुपसर्जनस्येति ह्रस्वत्वं प्रसज्येतेति उभयत आश्रयणे नान्ता
दिवत् यदप्युच्यते ब्रह्मबन्धूच्छत्रं षत्वतुकोरसिद्ध इत्येकादेशस्यासिद्धत्वान्नित्यस्तुक् प्रसज्येतेति पदान्तपदाद्योरेकादेशोऽसिद्धः न चैष प
दान्तपदाद्योरेकादेशः यदप्युच्यते इह ब्रह्मबन्धूः वीरबन्धूरिति नद्यृतश्चेति कप् प्रसज्येतेति न ह्येतानां यो बहुव्रीहिरिसेवं तत् न चै
ष नद्यन्तानां बहुव्रीहिः शेषलक्षणस्त्वेहि कप् प्राप्नोति तस्माद्दीर्घोच्चारणं कर्त्तव्यं उङुग्रहणे प्राणिजातेश्चारज्ज्वादीनां उङुप्रकरणेऽ
प्राणिजातेरिति वक्तव्यं अलाबूः कर्कन्धूः अप्राणिजातेरिति किमर्थं ॥ ० ॥

पदान्तं चोपसर्जनं न चात्र स्त्रीप्रत्ययस्योपसर्जनत्वमिति ह्रस्वाप्रसङ्गः पदान्तेति अधीत्येसादृश्ये विसर्थः तस्मादिति उकारद्वयं दीर्घेण निर्दिष्टं तत्र द्वितीय उका
रः परत्वात् बाधकस्य शेषलक्षणस्य कपो बाधनार्थ इति भावः अलाबूरिति उङि सति नोङ्धात्वोरिति विभक्तेरुदात्तत्वप्रतिषेधो भवत्यलाब्वेति ॥ ॥

संहित सहितोरुरीति नन्वेकदेशाविकृतस्यानन्यत्वात् संहितशब्दग्रहणेन सहितशब्दस्य सिद्धं ग्रहणं एवं तर्हि विद्यमानं हितमस्य सहित इति यदा बहुव्रीहिः
तदर्थं वार्त्तिके सहोरुरीति सहेते इति सहा बहूरू यस्याः इति बहुव्रीहिः अयं वा विद्यमानार्थस्य सहस्य सहोरूरित्यत्र विशेषप्रतिपादनार्थः प्रयोगः कद्रु गुग्गुलम

धुकवाकुः अरज्वादौ नामि निकिमर्थं रज्जुः हनुः संहिता सहित सहाभ्यां चेति वक्तव्यं संहितोरूः सहोरूः कद्रु अत्र सत्यमिदमुच्यते कद्रु कमण्डल्वोरिति।
कद्रु कमण्डलु गुग्गुलु मधु जतु पतयालू नामिति वक्तव्यं कद्रूः कमण्डलूः पीलानचलदमध निययने रजावती भृगजानू कुरुश्रवोलक्ष्मी पतयालूः पङ्
ग्वादि पाद्यपत्न ग्वादि पाद्यपत्न ग्वाद्यत्न्यः शार्ङ्गरवस्य पौतिमाष्या तज्ज्ञाय मप्यर्थः गौकक्ष्यशब्दः क्रौड्यादिषु पठ्यते स न पठितव्यो भवति यदि न पठ्य
ते गौकक्षीपुत्र इति संप्रसारणं न प्राप्नोति इष्यते चैतत्संगृहीतं गौकक्ष्यापुत्र इत्येव भवितव्यं एवं हि सौनागाः पठन्ति ष्यङः संप्रसारणे गौकक्ष्यायाः
प्रतिषेध इति आवट्याच्च अनउपधालोपिनः बुधसोर्ङीषः पूर्वविप्रतिषिद्धं अन उपधालोपिनोऽन्यतरस्यामित्येतस्मात् बुधसोर्ङीष् भवति पूर्वविप्र
तिषेधेनाः न उपधालोपिनोः न्यतरस्यामित्येतस्यावकाशः बहुराजी बहुतक्ष्णी। बुधसोर्ङीष् भवतीत्यस्यावकाशः विभाषादीर्घयशानदीप्र सो वका
शः ङीप्प्रसंगे उभयं प्राप्नोति बुधसोर्ङीष् भवतीत्येतदनुवर्त्तिष्यते आवट्याच्च नेष्यद्वाप आवट्यायं नेष्यद्वायोभवति पूर्वविप्रतिषेधेन आवट्याय
नेष्याद्यो वकाशः उदीचां आवट्याष्फस्यावकाशः अन्यानि गर्गादीनि गार्ग्यायणी वात्स्यायनी आवट्यशब्दात्त्वाचामुभयं प्राप्नोति आवट्याय
नी ष्फो भवति पूर्वविप्रतिषेधेन आवट्यग्रहणेन नार्थः यत्नेष्यद्वाप इत्येव इदमपि सिद्धं भवति शार्ङ्गरवस्यायणी पौतिमाष्यायणी। यन्त्र्य
×वति पूर्वविप्रतिषेधेन सतर्हि पूर्वविप्रतिषेधो वक्तव्यः। न वक्तव्यः। अनउपधालोपिनोऽन्यतरस्यामित्यत्रोधसोऽपि भू॰१॰ ग्रहणेन नार्थः॥ ॥ ॥
धुजतूनां छंदसि लिंगव्यत्ययेन सिद्धं पतयालुशब्दः स्त्रीलिंगगृहीसालुजंतः यङ् ग्वादि शार्ङ्गरवस्येति गर्गादियञन्ता एते आव। अन इति यद्यपीदमत्र
वक्तव्यं तथाप्यन्यार्थं पूर्वप्रतिषेधप्रतिपादनप्रसंगेनात्रोक्तं॥ ॥०॥ ॥श्री ॥ ॥

नां

Right margin: पर्यंतात्

गौकक्ष्यायणीतिं गोकक्ष्यस्यापत्यं गोत्रं स्त्री गर्गादित्वाद्यञ् ततः ष्फ उ प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम् यञन्तात् ष्फो विधीयमानः ष्फरं तादपि
भवतीति प्रक्रिया अत्रैव गोत्रमुक्तं इयमिमां दाक्षीति इक्षस्यापत्यं गोत्रं स्त्री सतरप् उत्तमशब्दमप्युत्तमं समात्रवचनमाश्रित्य प्रश्नः सवेति यत्रैकोनुत्तरगतः प्रय
मोच्चारितत्वात् त्रयस्तु कृता उद्यश्चोच्चारिताः तत्रोत्तमशब्दः प्रयुज्यते एवं च चतुष्प्रभृतिषु प्रयुज्यते उत्तरगतापेक्षया च त्रिप्रभृतिष्विष्टमुक्तं प्रकर्षे चेति चराचे
दर्शे वर्त्तते क्वचित्तु प्रकर्षे चेदिति पाठः यदि प्रकर्षप्रत्ययं कृत्वा दाक्ष्यायण रूपोत्तमं न भवतीत्युच्यते तत उत्तरस्य ह्रस्वमपि सिद्धमिति किमर्थमिदं अयं ह्यादि सौमसंयमप्रमं

सकृत्स्थापरसेवं गोकक्ष्यशब्दः कौरव्यादिषु पठ्यते इदमपि सिद्धं भवति गौकक्ष्यायणी ततस्तर्हि बहुत्वं न बहुत्वं एवं वृक्षादिषु चाप्यतद्धितः सर्वत्र
कुसर्वत्र यत्र ष्फस्थानस्य स्यात् प्राप्नोति ष्फ एव तत्र भवतीति ततो लोहितादिकतन्त्रेभ्यः सर्वत्र कुसर्वत्र प्राचां चोदीचां च इयमिमाः इह कस्मान्न भवति दा
क्षी दाक्षीति अत्रातिशायिकेनाप्यतमशब्देन निर्देशः क्रियते स च त्रिप्रभृतिषु वर्त्तते।। त्रिप्रभृतीनामभावात् यद्येवं प्रकर्षे चेत्तमं कृत्वा दाक्ष्यायणो
पोत्तमं गुरु आम्विधिः केन तेन तस्मात् प्रकर्षे यद्यप्यतमः प्रकर्षे चेत्तमं कृत्वा दाक्ष्यायणोपोत्तमं गुरुर्वियुच्यते आम्विधिः केन तत्र तस्मात् इष्ट्वयादि
ति प्राप्नोति प्रकर्षे यद्यप्यतमः यद्यप्यतमः प्रकर्षे वर्त्तते उत्कृतस्य प्रकर्षोयं गतशब्दाः त्रलुप्यते उत्कृतस्यायं प्रकर्षः गतशब्दस्यात्र लोपो भवति
१ नामयार्थप्रकर्षोस्ति धात्वर्थोत्र प्रकृष्यते ।। ।।

एतेनेवाधाः भाष्यकाराणां नजातिकृत्याणां संप्रधीकरणाभावादिति विचार एकारा ।।

=तस्यासत्त्वरूपत्वाद्द्रव्यरूपवारा= =मः प्रातिःस्यात्तु तथैतिलावः १=

गारुत्तमामिति प्राप्नोति उत्तरगतस्येति उच्छूढोत्तमसाधनक्रियावचनः तत्र क्रियाप्रकर्षद्वारको द्रव्यप्रकर्षः इसद्रव्यप्रकर्ष इति वचनादाम्न भवतीत्यर्थः ग
त शब्दोत्रेति उच्छब्देन गतार्थस्याभिधानाद प्रयोग एव गतशब्दस्य लोपः धात्वर्थोत्रेति धातुशब्देन धात्वर्थोत्र क्रियाभिधीयते सोर्थः प्रयोजनं विषयो
वा यस्य स धात्वर्थः साधनाधाराः पदार्थाः स प्रकृष्यते क्रियाप्रकर्षद्वारेणेत्यर्थः ।। ।। ।। ।।

=कर्मत्वादिशक्त्याधारः १= ननु धात्वर्थप्रकर्षेण्य द्रव्यप्रकर्षेपचतित रामित्यत्रैवाम्स्यादत आह धातुशब्देनेति प्रयोजनमिति क्रियार्थसाधनोपादानात्क्रियातस्य योजनं विषय इति उद्देश्यमित्यर्थः २=

भा॰ कै॰ ४ त्रयाणामिति यत्र त्रयो वर्णास्तत्रैकोऽनुत्पन्नो द्वावुत्पन्नौ द्वयोश्चैकस्य प्रकर्षेत्तरया तमपो वा धनादुत्तमशब्दो नास्तीति वा एकस्य निर्धारण न प्राप्नोति यत्र तु चतुष्प्रभृतयो
३८ वर्णास्तत्रैव षष्ठ्यादि सम्भवः मिद्यत इति नमयः पिताऽनुत्पन्नत्वादुत्तमशब्दस्याधुना प्राप्नोत्संतो दात्र एक्ष्यते एतच्चोच्छादि पूर्वमशब्द त्वमौ सर्वत्रेति पाणिन पे
श्चयोक्तं न च क्रियाप्रकर्षे प्रामंतस्य क्वचित्प्रयोगो दृष्टः तदस्यानभिधानादुत्पद्यमानमेव नास्ति॥ अप्युत्पन्न एव तूत्तमशब्दः स्वभावात्त्रिप्रभृतीनामेव समाहेश हेला॰
ह्यांतरमिति दृष्टमिति त्रिग्रहणं बहुलोपलक्षणार्थं तेन त्रिप्रभृतिषु यदन्यंतरमंतर्भूतं तत्र दृष्टमित्यर्थः आतिशायिकेति आतिशायिकश्चतुष्प्रभृतीनामं

नायमन्वयार्थे सम्प्रकर्षः कस्मात्तर्हि वाक्यार्थस्य उद्धृतोपेक्षन्ते किं चित्त्रयाणां द्वौ किलोद्धृतौ अत्रोद्धृतमपेक्ष्यो द्धृतरसे न इवति त्रयाणां द्वौ किलोद्धृतौ त्र
याणां किल द्वावुद्धृतौ भवतः चतुष्प्रभृतिकेष्वो वाऽरत्थायां न सिध्यति चतुष्प्रभृतिषु ष्वद्वं कस्मात् वारत्थायां न सिध्यति वारत्थायां न प्राप्नोति किंका
रणं चतुष्प्रभृतीनाम भावात् मिद्यते स्म स्वरान्ते न विधिश्चामो न लक्ष्यते भिद्यते खल्वस्य सरस्तेन आतिशायिकेन तमशब्देन उत्तमस्य विधिश्चामोन अवर्णान्तमिदं ३८
कश्चिदपि लक्ष्यते शब्दो न रमिदं विद्याद्दृष्टमन्यतरं त्रिषु एवं तत्र्यस्तो य मातिशायिकेन समानार्थस्तम [redacted]
त्रिप्रभृतिषु वर्तते किं पुनरयमणिमो रादेशः आहोस्विदणिम्मां परः कस्मात्र विशेषः अङ्गनादेशे यलोपवचने अदि॰ अनादेशे य
९ लोपो व्यक्तस्य औरमेध्याया पृच्छामाः औरमेधाः॥ ॥ ॥

शः कालिकेर इति कालेयकालिकापौलिकेर इति पुलिकातन्नामिकाश्च ढ्राच जांबेय इति चतुष्पाल्लक्षणो ढञ् ढे लोपोकद्र्वा इति उकारलोपः जंबूशब्दस्य

तत्रारंभसामर्थ्यादिन्यासस्येतापुनरण्ग्रहणादणेव भवति ऋष्यं ऋषिभ्यश्चाणो ढक् ढ्कौ विप्रतिषेधेन ऋष्यणः शिवाद्यणश्च ढक् ढ्कौ भवतो वि
प्रतिषेधेन ऋष्यणोवकाशः वाशिष्ठः वैश्वामित्रः ढकोवकाशः दुलि दौलेयः बलि बालेयः इहोभयं प्राप्नोति अत्रि आत्रेयः शिवाद्यणोवका
शः मर्कंडिका मार्कंडिकः । ढ्कोऽवकाशः कालिकेरः इहोभयं प्राप्नोति पैलिकेरः मौद्गलिकेरः ढक् ढ्कौ भवतो विप्रतिषेधेन द्व्यचो ढको
ढ्क् ढञौ द्व्यचो ढक् भवतीत्येतस्माद् ढक् ढञौ भवतो विप्रतिषेधेन द्व्यचो ढक् भवतीत्यस्यावकाशः दात्रेयः गौप्तेयः ढ्कः स एव । इहोभयं
प्राप्नोति नदीनाटेरं दासीदासेरः ढञोऽवकाशः कामंडलेयः माद्रवाहेयः ढकः स एव । इहोभयं प्राप्नोति जंबू जांबेयः ढक् ढञौ भवतो विप्रति
पं३ षेधेन नवर्ष्यणः पुनर्वचनमन्यनिरसनं वा एष युक्तो विप्रतिषेधः यो यमृष्यणो ढक् स्वविकारणं ऋष्यणः पुनर्वचनमन्यनिवृत्त्य
र्थं सिद्धो ह्यणुत्सर्गेणैव । तस्य पुनर्वचन एतत्प्रयोजनं ये मे तदपवादाः प्राप्नुवन्ति तद्बाधनार्थं सपयथैव तदपवादानिमान् बाधते एवं ढकमपि
बाधेत तस्माद् ऋषिभ्योऽणिविधाने आदिप्रतिषेधः तस्माद् ऋषिभ्योऽणिविधाने आदिभ्यः प्रतिषेधो वक्तव्यः नवक्तव्यः ॥ ॥ ॥ ॥

स्त्रीप्रत्ययान्तत्वाड्ढक्प्राप्तिः शिष्टैः सा । न वेति प्राप्तिमात्रं बाध्यं मन्यते ॥ श्री श्री श्री ॥७॥ ॥७॥

मध्येऽपवादाः इति एवं सनि ज्ञातस्वरूपत्वाद्बाध्यत्वं न तूत्तरस्या निर्ज्ञातस्वरूपस्येति भावः अथात्राह कथं पुनर्नित्यानां शत्रूणां नामनित्यां धकारादिवृंशत्यन्यायेणान्वाख्या

मध्येऽपवादाः पूर्वान्विधीन्बाधंते इति एवमयमपरथ्यण् इत्येतदपवादं बाधिष्यते ढकं न बाधिष्यते अयं चाप्ययुक्तो विप्रतिषेधः यो यं ठकः द्व्यचः ठञोऽस्य।
किं कारणं ढकः पुनर्वचनमन्यनिवृत्त्यर्थं सिद्धो ऽत्र ठक् स्त्रीभ्यो ढगित्येव। तस्य पुनर्वचन एतत्प्रयोजनं। ये न्येतदपवादाः प्राप्नुवंति तद्बाधनार्थं म
१२ यथैव तदपवादं तन्नामिकाणं बाधते एवं द्व्यचं भावयिवाधेत तस्मात्तन्नामिकाणप्यच्चः तस्मात तन्नामिकाणित्यचश्चेति वक्तव्यं नवक्तव्यं मध्येऽप
वादाः पूर्वान्विधीन्बाधंत इति एवमयं ठक् तन्नामिकाणं तदपवादं बाधिष्यते द्व्यचष्ठञं न बाधिष्यते कथं धकवृष्णिकुर्वणाः सेनांतास्य? अस्य
धकवृष्णिकुर्वणाः सेनांतायेणो भवति विप्रतिषेधेन अस्यणः वकाशः वासिष्ठः वैश्वामित्रः एतस्यावकाशः पाणिखिरेयः वाणिखेरेयः जातसेनो ना
मऋषिः तस्मा उभयं प्राप्नोति एणोभवति विप्रतिषेधेन जातसेन्यः अधकाणोः वकाशः श्वाफल्कः चैत्रकः एतस्य सस्य उग्रसेनो नामांधकः त
स्मा उभयं प्राप्नोति एणो भवति विप्रतिषेधेन [redacted] औग्रसेन्यः वृष्ण्यणः वकाशः वासुदेवः बालदेवः एतस्य स एव वि
श्वक्सेनो नाम वृष्णिः तस्मा उभयं प्राप्नोति एणो भवति विप्रतिषेधेन वैश्वक्सेन्यः। कुर्वणोः काशः नाकुलः साहदेवः एतस्य स एव भीमसेनो नाम कुरुः त
स्मा उभयं प्राप्नोति एणो भवति विप्रतिषेधेन भैमसेन्यः। सेनांता एणो भवति विप्रतिषेधे न जातोग्रविश्वक् भीमेभ्य इति वक्तव्यं॥ ॥

नंथु जते अत्र समाधिः त्रिपुरुषानूकं नाम कुर्यादिति न्यायेनांधकादिवंशानापि निसाएत्व अपवाद निसोपापाक्षायेणापि निसस्यान्वाख्यानं दृश्यते यथा शक
१९ अथ योन कालस्य॥ श्री ॥

=तन्नामिकाणि एवं द्व्यचो दि
=स्त्रीभ्यो ढगित्येव ठक् किमिदं
=कायत्रिनिपयवक्तव्यं तक
=र्न्नमिति भावः ॥२॥

मातु अप्रसिद्धत्वं नियोगे नोक्तायं वचनं स्त्रीलिंग इति अर्थधर्मे स्त्रीत्वं शब्दे समारोप्य क्रियाशब्दनिर्देशः स्त्रीलिंगनिर्देशः कृतः। न्यायानुसारस्त्वयं निर्देशः संबंधिशब्दस्याप्रसिद्धत्वात्तत्स्वैव ग्रहणं स्याविद्धत्वात् एतच्चावाक्यादिभिस्त्रीत्वेनोक्तं कन्या यदीति अक्षतयोनिः कन्या सा कथमपत्येन संबध्येतेति भावः अभिसंबंधपूर्वक इति शास्त्रोक्तो विवाहाभिसंबंधस्तत्पूर्वके पुरुषसंयोगे कन्याशब्दो निवर्तते या तु शास्त्रोक्तेन विवाहसंस्कारेण विना पुरुषं युनक्ति सा कन्यात्वं न जहातीति कन्योक्ताया इति कन्यैवासावुक्ता तदेव व्याचष्टे कन्याभिमताया इति कन्यैवासावभिमतास्य तिकारणमित्यर्थः सुदर्शनाया इति प्रकृत

मातुः किमर्थं स्त्रीलिंगेन निर्देशः क्रियते न संख्यासंभद्रपूर्वे से से वाच्ये तत् स्त्रीलिंगोयं मातृशब्दस्तस्माद्यथा स्यात् इह मा भूत् संमिमीते संमाता संमातुरपत्यं सांमातुरः कन्या इदं विप्रतिषिद्धं को विप्रतिषेधः अपत्यमिति वर्तते यदि च कन्या नापत्यं अथापत्यं न कन्या। कन्या चापत्यं चेति विप्रतिषिद्धं। नैतद्विप्रतिषिद्धं कथं कन्याशब्दोयं पुंसाभिसंबंधपूर्वके संप्रयोगे निवर्तते। या चेदानीं प्रागभिसंबंधात्पुंसा सह संप्रयोगं गच्छति तस्यां कन्याशब्दो वर्तत एव कन्यायाः कन्योक्तायाः कन्याभिमताया सुदर्शनाया यदपत्यं स कानीनः 'स्त्रीभ्यो' इदं सर्वं चैव स्त्रीग्रहणे
''पुंविचार्यते स्त्रीग्रहणे स्त्रीप्रत्ययग्रहणं स्यात् स्त्रीशब्दग्रहणं वा ॥ ॰ ॥

दर्शनाया अगुप्तत्वादित्यर्थः अन्ये त्वाहुः मुनिर्देवतामाह तस्याद्यापुंयोगेप्यक्षतयोनिर्भवति। यथा कुंती मन्त्राकृतदिनकरोत्पादितकर्णा एवं पुत्रापि पुनः कन्यैव भूत् तदपत्यं कानीनशब्दाभिधेयं 'स्त्रीभ्यो' बहुवचननिर्देशात् स्वरूपग्रहणं निरस्तं पक्षत्रयसंभावनापूर्वकं प्रत्ययग्रहणमेव व्यवस्थापयते इदं सर्वं स्थिति न त्वेकं विकल्पे सिसृक्षन्नाश्रीयते इह तु स्वरितत्वप्रतिज्ञानात्स्वरितेनाधिकार इत्यस्य स्वरितेनाधिकारगतिर्भवतीत्यस्याप्यर्थस्याश्रयणात् द्वावपि प्रत्ययग्रहणं स्त्रियां किं निर्दिष्टं तत्प्रकरणविहितास्तत्प्रत्यया अवधानान्न गृह्यते स्त्रीशब्दग्रहणमिति स्त्रीलिंगानां शब्दानां ग्रहणमित्यर्थः ॥ ॥ ॥

से २

भा०कै०४
६६

स्त्र्यर्थग्रहणमिति अर्थैकार्यो सम्भवेत्तु तदभिधायि शब्दग्रहणमेव संबध्यते इडविडादयं शब्दाद्वीहृत्त्रयो न तु स्त्रीप्रत्ययांता इति [redacted] तेभ्योऽणेव भवति दरद्वाया इति हृषो वी जाश्वः तेन चार्थेन त्रिशेषु द्विहिते नापत्यं ल क्षणो येौढ कोबाध्यते ते नापत्येवाड्वइतिभवति क्रौंचेइति अपत्य एवायं ठगपवादः चटपुल्लिं

स्त्र्यर्थग्रहणं वेति किंचातः यदि शब्दग्रहणं अर्थग्रहणं वा इडविड् ऐडविडः दृषद्वार्षद्यः उशिक् औशिजः दरत् दारदः अत्रापि प्राप्नोति अर्थप्र
त्ययग्रहणेऽले रवाश्रेयः वैमात्रेय इति न सिध्यति अस्तु प्रत्ययग्रहणं कथं ले खाश्रेयो वैमात्रेय इति शुभ्रादिषु पाठः करिष्यते वडवायाः वृषे
वाच्येठगवक्तव्यः वडवायावृषः वाडवेयः अण् क्रुंचा कोकिला तस्मात् क्रौंचः कौकिलः आरकं पुंसि तत्तो मत्रं तत्तो मत्रं पुंसि आरगवक्तव्यः
मूषिकायाः पुमान् मौषिकारः मृग्याः पुमान् मार्गारः गोधाया द्रग्विधौ स्मृतः गोधायाः पुमान् गौधेरः चटका ऐरक् चटकायाः पुल्लिंगनि
र्देशः चटकायाः पुल्लिंगेन निर्देशः कर्तव्यः इहापि यथा स्यात् चटकस्यापत्यं चाटकैरः यदि पुल्लिंगनिर्देशः क्रियते चटकायाः अपत्यं चा
टकैरः इति न सिध्यति प्रातिपदिकग्रहणे लिंगविशिष्टस्यापि ग्रहणं भवतीत्येवं भविष्यति स्त्रियामपत्ये लुग्वक्तव्यः चटकस्यापत्यं चटका
आरगुदीचां आरग्वचनमनर्थकं रकास्ति हुलात् आरक्वचनमनर्थकं किंकारणं रकासिद्धत्वात् गोधायाश्चाकाणं तारक् च प्रत्ययः एवं तर्हि
सिद्धे सति यदारकं शास्ति तत् ज्ञापयत्याचार्यः अन्येभ्योऽपि भवतीति किमेतस्य ज्ञापने प्रयोजनं जारारः पांडारः इत्येतत्सिद्धं भवति क्षुद्राभ्यो
वा क्षुद्राभ्य इत्युच्यते काः क्षुद्रा नाम अनियतपुंस्का अंगहीना वा ढकि लोपः केन विहितः पितृष्वसुः ढकि लोप इत्युच्यते एतदेव ज्ञापयति॥
गेनेति अस्यापुल्लिंगात्स्त्रप्रसज्येत क्षुद्राभ्यो अंगहीना वेति॥ वा शब्द आर्यं ॥ श्री ॥७॥ श्री ॥ ११५०
६६

= ननु चशब्दसहितपाठस्य तत्रे सूपलंभादेवं वक्ष्यामीत्ययुक्तमत आह॥ आख्यास्यामीति। भावः स्त्रे चशब्दरहितः पाठ इति भाष्यस्वरसः॥ १८ =

मातृष्वसुः तत्रेदमिति अनेन तस्य विधिं मन्यते एवं वक्ष्यामीति आख्यास्यामीत्यर्थः चकारेण पितृष्वसुरिस नुक्त इति कार्ये द्वयलाभः राजश्वसुराद्यत् राज शब्दः क्षत्रियशब्दपर्यायः जातिग्रहणमिति यदा प्रकृतिप्रत्ययसमुदायेन जातिर्गम्यते तदा प्रत्ययो नान्यदा तेन क्षत्रियजातौ प्रतिपिपादयिषितायां राजन्य शब्दप्रयोगो वैश्ये शूद्रे वा राजापत्ये राजनशब्दप्रयोगः॥ अन्तःपत्ने प्रत्ययार्थाभावादिति भ्रातृव्यशब्दः सर्वस्मिन्सपत्ने इष्यते॥ नहि सर्वैः सपत्नो भ्रातुर

पितृष्वसुर्ढगिति यदयं ढकि लोपं शास्ति मातृष्वसुः ढकि लोप इत्युच्यते तत्रेदं न सिध्यति मातृष्वस्रीयः नैष दोषः एवं वक्ष्यामि पितृष्वसुश्छण् ढकि लोपः ततो मातृष्वसुश्च। पितृष्वसुर्यदुक्तं तत् मातृष्वसुर्भवतीति किं पुनस्तत् छण् ढकि लोपाविति राजश्वसुराद्यत् राज्ञोपत्ये जातिग्रह णं राज्ञः अपत्ये जातिग्रहणं कर्तव्यं राजन्यो नाम जातिः क्व मा भूत् राजन इति व्यन् सपत्ने अन्वचनमनर्थकं प्रत्ययार्थाभावात् अनवचनमन र्थकं किं कारणं प्रत्ययार्थाभावात् किमिदं प्रत्ययार्थाभावादिति अपत्यार्थाभावात् अपत्यमिति वर्तते अनपत्ये चापि सपत्ने भ्रातृव्यशब्दो वर्तते पाप्मना भ्रातृव्येण अस्त्वतावदपत्यं सपत्नस्य तत्र भ्रातृव्य इति कथं पाप्मना भ्रातृव्येणेति उपमानात्सिद्धं भ्रातृव्य इव भ्रातृव्य इति गोत्रस्त्रि यां कुत्सने णच किमर्थो णकारः वृद्ध्यर्थः ञ्णितीति वृद्धिर्यथा स्यात् गार्गी जाल्मः [redacted]
[redacted] गोत्रस्त्रियाः प्रत्ययस्य णित्करणानर्थक्यं वृद्धत्वात्प्रातिपदिकस्य गोत्रस्त्रियाः प्रत्ययस्य णित्करणमनर्थकं॥ ॥ ॥

प्रत्ययार्थस्याभाव इत्यर्थः अस्तु तावदिति विरोधाभावात्सपत्नेनापत्यार्थो न बाध्यते न च समुदायार्थः सपत्नः प्रकृतिप्रत्ययार्थयो रुपसमित्यपत्यलक्षणस्य प्रत्ययार्थस्याभाव इत्यर्थः
स्याग प्रसंगात् न च गसंतरसंभवे तस्यागो युक्त इति भावः गोत्र बहूनां गोत्रप्रत्ययानां वृद्धिमलदर्शनाद्विचारः गोत्रस्त्रिया इति॥ ॥ ॥

भा०कै०४ वातंड इति वतंडस्यापत्यं गोत्रं स्त्री वतंडाच्चेति यञ् तस्य लुक् स्त्रियामिति लुक् शार्ङ्गरवाद्यञो ङीन् वतंडी आङ्गिरसी अपत्यमिति णः अव्यवहितत्वादिति अचीति परसप्तमीम
६७ न्यते विषयसप्तम्यां तु न दोषः अयवायतो गोत्रप्रत्ययाद् व्यवहितो जादिः लुग्घेते तस्य लुगिति विज्ञानाद्विषयसप्तम्यामपि दोषाय व्यवधानं पुंवद्भावादिति पुं
वद्भावेन ङ्याप निवृत्तेः शार्ङ्गरवाद्यञो ङीन् तन्निवृत्तेर्णप्रत्ययस्य इति भावः स्रौचुकायन इति स्रुचुकस्यापत्यं स्त्री प्राचामिति ष्फिन् प्रत्ययः इतो मनुष्यजातेरिति ङीः

किंकारणं प्राप्ताः वृद्धत्वात् प्राप्ता तिपरिकल्पनं वृद्धमेवैतत् प्रातिपदिकं। लुगर्थे तर्हि णकारः कर्त्तव्यः यस्य लुगन्तं अवृद्धं तत्र वृद्धिर्यथा स्यात् वातंडो जाल्मः लुगर्थे
मिति चेन्न लुक्प्रतिषेधात् लुगर्थमिति चेन्न किं कारणं लुक्प्रतिषेधात्। प्रतिषिध्यते तत्र लुक् गोत्रेऽलुगचीति अव्यवहितत्वादप्रतिषेधः ईकारे
णाव्यवहितत्वात् प्रतिषेधो न प्राप्नोति। व्यवहितत्वादप्रतिषेध इति चेत्तन्न पुंवद्भावात् अव्यवहितत्वादप्रतिषेध इति चेत्तन्न किं कारणं पुंवद्भावात्
पुंवद्भावोऽत्र भवति भस्याढे तद्धिते पुंवद्भवतीति फिनर्थे तु णकारः कर्त्तव्यः यत् फिन्नन्तमवृद्धं तत्र वृद्धिर्यथा स्यात् स्रौचुकायनो जाल्म
इति पुंवद्भावप्रतिषेधार्थं च णकारः कर्त्तव्यः गार्गीभार्यः अस्य गार्गीभार्यः वृद्धिनिमित्तस्येति पुंवद्भावप्रतिषेधो यथा स्यात् गोत्राद्यून्यस्त्रि
यामिति वचनात् प्रयोजनं गोत्राद्यून्यस्त्रियामिति वचनात् प्रयोजनमेतद्भवति नास्ति गार्गी इति अवंश्यत्वाद् स्त्रियाः प्रयोजनं अवंश्य
त्वाद् स्त्रियाः प्रयोजनमेतद्भवति॥ ॥

षु पुंवद्भावे कृते णः नास्ति गार्गेति गार्ग्या अपत्यं स्त्री तत्रार्थे नास्ति प्रत्ययः अस्त्रियामिति युवसंज्ञानिषेधात् गोत्रसंज्ञा वक्ष्यमाणादेको गोत्र इति नियमाद्गोत्रप्र
त्ययान्तात् परगोत्रप्रत्ययानुत्पत्तेः अवंश्यत्वादिति गार्ग्या अपत्यं पाक्षी तस्या न युवसंज्ञा नापि गोत्रसंज्ञा न हि सा गार्गस्यापत्यं। पौत्रप्रभृतेरपत्यस्य गोत्र एम०
संज्ञा विधीयते तदभावादेको गोत्र इति नियमाभावात् स्यात् प्रसङ्ग इति गार्गेस्यर्थः॥ श्री ॥ ॥ ६७

=स्त्रियाः कुलपुरुषापतनहेतुत्वाभावात्.१=

=मनुपोत्रप्रभृतीनत्र पुंस्त्वस्य विवक्षितत्वात् गोत्रत्वमत आह। पौत्रे ति।१२=

न च स्त्रीवृंशेपेति। पितृपितामहादिवंशेन मातृमातामहादिरिति यथेः तस्मात्पुंवद्भावप्रतिषेधार्थे णकारः। न च जातेश्चेति प्रतिषेधः सिध्यति गोत्रत्वाभावे जातित्वाभा
वात् यस्य चेगोत्रे चचरणैः सहेत्यत्रापत्यमात्रं गोत्रं ग्रह्यते तेन तदा जातित्वमस्त्येव फिन्नर्थक्यं कर्त्तव्य एव णकारो गृह्ये मातृवंश इति गार्ग्या अपत्यं या स्त्री सा मा
तृवंशेन गार्गी कुलाभवस्येवेति गर्गापेक्षया तस्या गोत्रत्वादेको गोत्र इति नियमात् प्रत्ययान्तराभावात् नास्ति गार्गी। पौत्रप्रभृतिग्रहणं तु व्यवहितापत्यस्योपलक्ष

=द्वावपीत्यर्थः।१९=

न च स्त्रीवंशेणा अस्ति गार्गो स्त्री। अपरआह। द्वावेव वंशौ मातृवंशः पितृवंशश्च। यावता मातृवंशोस्ति नास्ति गार्गो। वृद्धाट्ठक् सौवीरेषु बहुलं गो
त्रस्त्रियाः। वृद्धाट्ठक्। फेः छ च। फाण्टाहृति। इमे चत्वारो योगाः। एषां त्रयः कुत्सने। त्रयः सौवीरगोत्रे। आद्यो योगः कुत्सन एव। अन्ये सौवीरगोत्र एव।
फाण्टाहृतिमिमताभ्यां णफिञौ। किमर्थो णकारः। वृद्ध्यर्थः। निती ति वृद्धिर्यथा स्यात्। फाण्टाहृतः। फाण्टाहृतेः प्रत्ययस्य सातिशयकरणार्थं कस्य वृद्ध
त्वात् प्रातिपदिकस्य फाण्टाहृतेः प्रत्ययस्य णित्करणमनर्थकं किं कारणं वृद्धत्वात् प्रातिपदिकस्य वृद्धमेवैतत् प्रातिपदिकं पुंवद्भावप्रतिषेधा
र्थं णकारः कर्तव्यः। फाण्टाहृता भार्या अस्य फाण्टाहृताभार्यः। वृद्धिनिमित्तस्येति पुंवद्भावप्रतिषेधो यथा स्यात् उक्तं वाक्किमुक्तं गोत्राद्यूनस्त्रियाः
एमिति वचनात् प्रयोजनमिति अत्र वंशपत्वाद्गोत्रस्त्रियाः प्रयोजनमिति [redacted] ॥

णात्तस्मात् फिन्नर्थ एव णकारः। वृद्धाच्च सौवीरगोत्रस्त्रियाः इति विषयविभागकल्पनार्थो त्रोपक्षेपः। कुत्सनग्रहणं सौवीरग्रहणं च सूत्रद्वयस्यानुवर्तनाद्यथो
क्तविषयविभागलाभः। फाण्टा फाण्टाहृतेरिति यथासंख्यसंबन्धस्येष्टत्वान्न मिमत शब्दार्थेति लक्ष्यैव निपातनवलाच्छात्तु शास्त्रेनाव श्यं सर्वो न्याय्यीयत इति तद
नाश्रयणमपि न यथासंख्याभावं सूचयितुमलं शिष्टं भाष्यं पूर्ववद्व्याख्येयं [redacted] श्री ॥७॥ ॥ ॥

=नत्वस्याक्षरत्वान्मिमतस्य पूर्वनिपाते कर्त्तव्ये तदकरणं यथासंख्याभावबोधनद्वारा मिमतास्यार्थमिति=

[redacted]

कुर्वा०

भा०कै०४ वामरथस्येति। ककारान्तस्य प्रत्ययान्तस्येति विज्ञेयं कण्वादीनां यञन्तानां यत्कार्यं तदतिदेशः केवलानां तेषां कार्यस्य कस्यचिद् विधानात् वामरथ्या इति छे प्राप्ते तिवि
६८ धिः आपत्यस्येति यलोपः यस्येति कण्वादिवदिति वचनात् कण्वादीनामाहृत्य यत्कार्यं विहितं कण्वादिभ्यो गोत्र इति तस्यैवातिदेशः प्राप्नोति ननु यञन्तमात्र निबं
धनस्येति भावः एवमपीतिसामान्यातिदेशात् यदयमिति लिंगाद्याहृत्यानाहृत्य च कण्वादीनां यञन्तानां यत्कार्यं विधीयते तदतिदिश्यते उदीचां उदीचामिति।

कुर्वादिभ्यो ण्यः॥

वामरथस्य कण्वादिवत्स्वरवर्जं वामरथस्य कण्वादिवद्भावो वक्तव्यः किमविशेषेण नेत्याह स्वरवर्जं स्वरं वर्जयित्वा। किं प्रयोजनं वामर
थ्यस्य छात्राः वामरथाः कण्वादिभ्यो गोत्र इत्यण् यथा स्यात् यदि कण्वादिवदित्युच्यते प्रत्ययाश्रयमनतिदिष्टं भवति तत्र को दोषः वामर
थ्याः बहुषु लोपो न प्राप्नोति वामरथ्यानां संघः वामरथ्यः संघोऽङ्कलक्षणेष्वञ्यञिञामण् इत्यण् न प्राप्नोति यदि पुनः प्रत्ययवदित्युच्य
ते। एवमपि प्रकृत्याश्रितमनतिदिष्टं भवति तत्र को दोषः वामरथ्यस्य छात्रा वामरथाः कण्वादिभ्यो गोत्र इत्यण् न प्राप्नोति उच्य
ते तर्हि कण्वादिवदित्येव कथं वामरथ्याः वामरथ्यानां संघ इति च यदयं स्वरवर्जमित्याह तत् ज्ञापयत्याचार्यः प्रत्ययाश्रयमप्यतिदिष्टं भ
वतीति उदीचामिञ् उदीचामिञ्विधौ तक्षणोऽण्वचनं उदीचामिञ्विधौ तक्षण एव वक्तव्यः ताक्ष्ण्यः यदि पुनरयं तक्षन् शब्दः शिवादिषु
पठ्येत। शिवादिरिति चेत् अण्विधिः शिवादिरिति चेत् अण्वो विधेयः ताक्षण्यः॥ ॥

इञ्बाधनार्थत्वात् विधेयं वचनं ताक्षण इति षपूर्वहन्धृतराज्ञामणीत्यल्लोपः यस्येति विशेषविहितेन अणा बाधितत्वादिञ्न भविष्यतीति भावः अण्वि राम०
धिरिति यद्यण्कार्यमात्रं बाध्यते तदा द्वयोरपि अणोर्बाधः स्यात् अथ विशेषचिन्ता तदा पुरस्तादपवादा इति न्यायात् अणस्यैव बाधा प्राप्नोतीत्यर्थः॥ ६८

=ननु भावां मते यदि नार्थः शिवादिपाठो तत्राह दिशा इति कार्यमात्रस्य बाधनात्=

सिद्धं त्विति द्विकल्पितण्यपुक्ते पक्षे तस्य न्याय्यात् प्राग्दीव्यतोऽणित्यण् भवति ननु जातस्य सेनोग्रसेनविष्वक्सेनभीमसेनेभ्यो ण्येन मुक्ते पक्षे स्त्रियाम् अत इञादि
त्व क्षणः प्राप्नोति। यथा न्यासेनु तेभ्यो ण्ये औ भवतः। एवं तर्हि बाह्वादेराकृतिगणत्वादेतेभ्यो ण्येन मुक्ते इञ् भविष्यतीत्यदोषः। कौसल्य। किमिदमिति कौ

मिदं तूदीचांवा ण्यवचनात्। यदि इदमेतत् कथं उदीचांवा ण्यवचनात् उदीचां वा ण्यो भवतीति वक्तव्यं ण्येन मुक्ते यो यतः प्राप्नोति स ततो भविष्यति
कौसल्यकार्मार्याभ्यां च। किमिदं कौसल्यकार्मार्याभ्यां विकृतयोर्ग्रहणं क्रियते एवं विकृताभ्यां यथा स्यात् अकौसल्यमिदमुच्यते कौसल्यकार्मार्या
भ्यां चेति। किमन्यप्रकरणेऽगुकौसल लकर्मारछागवृषाणां तु युक्तिस्त्रकाणोऽगुकौसलकर्मारछागवृषाणां युट्चेति वक्तव्यं द्गु। छागस्यायनिः
कौसलकौसल्यायनिः कर्मारकार्मार्यायणिः छागं छाग्यायनिः वृष वार्ष्यायणिः यदि युट् क्रियते युटि कृते नादिवृद्धाद्देशो न प्राप्नोति
इदमिह संप्रधार्यं आदेशः क्रियतां युडिति किमत्र कर्तव्यं परत्वादादेशः नित्यो युट् कृते प्यादेशो प्राप्नोति अकृतेपि युट् प्राप्नोति नित्यः अन्यस्य
कृते आदेशो प्राप्नोति अन्यस्याकृते। शब्दान्तरस्य प्राप्नुवन् विधिरनित्यो भवति अन्तरंगस्तर्हि युट् कांतरंगता उत्सर्गे निमित्ते प्रियो येन युड् उच्यते उ
सर्गेप्रत्यये प्रकृतिप्रत्ययावाश्रित्य संगस्यादेशः आदेशोऽप्यंतरंगः कथं वक्ष्यसे तत्र आपन्नादिषु पदेशिवद्वचनं स्वाभ्यां सिद्ध्यर्थमिति अत्र
नवकाशस्तर्हि युट् एवं तर्हि सर्वोत्तरं क्रियते। छागस्यादि आदेशो गुणे न प्राप्नोति अस्तु तर्हि पादिरेवा ननु चोक्तं युटि कृते अनादिवृद्धादेशो
४:करिष्यते यदिसर्वोत्तः४१
१९ न प्राप्नोतीति॥ ० ॥

सत्यमापसंहृदे कौसलाजारक्षुद्रिः। तिस्पइ।। कर्मारस्यापसंकारिलक्षणोऽण् इत्येवं कौसल्यकार्मार्य्यशब्दौ तयोर्ग्रहणं नेष्यत इति प्रश्नः। उत्तरं तु प्रस
प्रसक्तियोगेनैवं भूतप्रकृत्यादेशविधानार्थं एवं निर्देशः अगस्यादेश इति अगनिमित्तप्रत्ययावयवस्येत्यर्थः॥ ॥ श्री॥

=किंतु परमप्रकृतेः कौसलशब्दात् कर्मारशब्दाद्वेष्यत इति भावः।१९=

भा० कै० ४ चेनेति तेन युगपदागमादेशौ भवतः वार्त्तिकं क्रियत इति गणसूत्रमेवैवं पठ्यत इत्यर्थः यद्यपि वार्त्तिकनारीनां कुडेति सूत्रपाठे लाघवं भवति नलोपश्चेति गण
६९

नैष दोषः सिद्धं तादिष्टस्य युडुच्चनात् सिद्धमेतत् कथं आदिष्टस्य युडुच्चनात् युड्डादिष्टस्येति वक्ष्यामि तन्नार्हि वक्तव्यं न वक्तव्यं चेन संनियोगः करिष्यते युडुं किंच यच्चान्यत्प्राप्नोति किं चान्यत्प्राप्नोति आदेश इति वार्त्तिकनार्यादि पुनरयं कुट् प्रत्यादिः क्रियते कुटि प्रत्ययादेरादेशानुप पत्तिरनादित्वात् कुटि सति प्रत्ययादेरादेशो नोपपद्यते किं कारणं अनादित्वात् कुटि कृते अनादित्वादादेशो न प्राप्नोति एवं तर्हि परत्वान्तः करिष्यते परत्वान्ते नलोपवचनं यदि परत्वान्तः करिष्यते नलोपो वक्तव्यः चार्मिकायणिः वार्मिकायणिः नलोपः प्रातिपदिकान्तस्येति नलोपेन प्राप्नोति पदादौ पुनः सति नलोपः प्रातिपदिकान्तस्येति नलोपः सिध्यति अस्तु तर्हि पदादिरेव ननु चोक्तं कुटि कृते अनादित्वादादेशो न प्राप्नोतीति सिद्धं तादिष्टस्य कुडुच्चनात् सिद्धमेतत् कथं कुड्डादिष्टस्येति वक्ष्यामि तन्नार्हि वक्तव्यं न वक्तव्यं चेन सन्नियोगः करिष्यते कुडुं किंच यच्चान्यत्प्राप्नोति किं चान्यत्प्राप्नोति आदेशः सिध्यति सूत्रं तर्हि भिद्यते यथान्यासमेवास्तु ननु चोक्तं परत्वान्ते नलोपवचनमिति नैष दोषः क्रियते एतन्न्यास एव चर्मिन्वर्मिणोर्नलोपश्चेति कारिम्य इञोऽणो वासिक् छ्विप्रतिषेधेन कारिम्य इञ्भवती सेत स्मादगो वासिक् ञ्भव तिविप्रतिषेधेन कारिम्य इञ्भवतीसस्माव काशः आयस्कारिः लौहकारिः फिञोऽवकाशः तापसापनिःसा मितिकायनिः इहोभयं प्रा ''प्नोति नापितायनिः फिञ्भवति विप्रतिषेधेन॥ ॥ ॥

सूत्रैकदेशस्याकरणात्तथापि गणपाठस्य पश्चात्त्वात्तत्रपाठस्य नात्तुगणपाठदर्शनात्कुडेत्युक्तमिति भावः लिंगविशिष्टपरिभाषया चर्मिणी वर्मिणीभ्यामप्रत्ययविधा एम०
''नादृस्यादिति पुंवद्भावः सिध्यति कुटि तु भत्वाभावात्पुंवद्भावो न स्यात्॥ ॥ ॥ ६९

कहे तकु को उवश्यकर्त्तव्य तामाह ९१=

मनोऽपत्य इति। णत्वविधानार्थमिदं सूत्रणः सिद्धत्वात् नचनन्दंरमाणवां तेवा सिद्धिरिति निपातनात्णत्वस्य सिद्धत्वात् वचनमनारंभणीयं निपातनादर्थविशेषे
स्यानिश्चयात् अनधीनविद्यत्वान्मूढत्वं। विहिताकरणान्निषिद्धाचरणाच्च कुत्सितत्वं मानुषा इति अपत्याधिकारादपत्ये प्रत्ययो विधीयते जातिग्रहणं तु प्रकृ-
तिप्रत्ययविशेषणं ननु जातिः प्रत्ययार्थ इति यत्र भो भवति लुक्प्रसंगः। परादेरेतु ष अप्रभवति न त्वत्रेति लुगभावः ननु तदुक्तस्त ग्रहणेन ग्रहणं तद इति पणादव

मनोर्जातावञ्यतौ षुक्च अपत्ये कुत्सिते मूढे मनोरौत्सर्गिकः स्मृतः नकारस्य च मूर्द्धन्यस्तेन सिध्यति माणवः। यदि षुक्परवोन्तः क्रियते मानुषाः बहुषु
लोपः प्राप्नोति मानुषाणां संघः संघांकलक्षणेष्वञ्यञिञामणिति अण्प्राप्नोति अस्तु तर्हि परादिः यदि परादिः मानुषी अञ्यन्तादिति ईकारो
न प्राप्नोति अस्तु तर्हि पूर्वान्त एव। कथं मानुषाः मानुषाणां संघ इति च उभयत्र लौकिकस्य गोत्रस्य ग्रहणं नचैतल्लौकिकं गोत्रं किं तर्हि जा-
तिः इह तर्हि मानुष्यकमिति। हलस्तद्धितस्येति यलोपः प्राप्नोति परादावप्येष दोषः यद्धितद्धलस्तद्धितस्येति हल्ग्रहणं न तदंगविशेषणं किं वि-
शेषणं तु इह हि दोषः स्यात्। वकारेण वार्केणी इति तस्मादुभाभ्यामेव तत्तद्वक्तव्यं ॥ मत्कसाकेण जन्य मनुष्ययुवान इति॥ ॥ ॥

ने॰
प्यत्र प्रसक्तप्रसंगः एवं तर्ह्येकारप्रश्लेषादकारमात्रस्याणोऽत्र ग्रहणमणादावन्कार्याभावः ईकार इति शार्ङ्गरवाद्यञो ङीनित्यनेनेति भावः नचैतदिति अपत्ये
कुत्सादितस्यापि मानुषशब्दस्य ब्राह्मणशब्दस्येव जातिवाचित्वादपत्यवाचित्वाभावादिस्यर्थः इह नहीति हलेनांतंगास्य तद्धितयकारस्य लोप इति मन्यते हल
स्तद्धितस्येति वृत्तमाने आपत्यस्य च तद्धितेनातीति लोपोऽत्र प्राप्नोति हलस्तद्धितस्येत्यत्रवर्तिनीति विवर्ततेने वार्केणीति हक प्राग्वाहादासुधजीविसंघविशेषव
चनात्तार्थे टेण्यण प्रत्ययः॥ ॥ ॥०॥

=हिस्वादिपदागं·२= अवयवानामितिममशक्तिसंकोचलक्षणः।३= यथा गुणद्रव्ययोर्गुणे विशेषणत्वं द्रव्ये विशेष्यत्वं एवं संज्ञासंज्ञिसंबंधो ऽकृत्रिमएवेत्यर्थः।४=

भा॰कै॰४ अपत्यं पौत्रप्रभृतेरिति नन्वपत्यमात्रस्य लोके गोत्रत्वादपत्यविशेषे गोत्रशब्दस्य नियमार्थमिभाषेयं स्याद् व्याख्यानतु संज्ञा नैष दोषः लिंगवतीयं परिभाषा भवतीति विध्येन न
७० रशेषभूता वा नचैवं तथा यथा च वृद्धाध्यायस्य वार्थ्यस्यापनयोग्या अपि संज्ञिविशेषमात्रस्य वच्छेदकरणात्संज्ञा उच्यते तेनेयमपि उक्तं च हरिणा व्यवहाराय नि
यमः संज्ञानां संज्ञिनि क्वचित् नित्य एव तु संबंधो डित्थादिषु गवादिवन्नेह द्याद्यादीनां च शास्त्रे स्मिं छक्तेरवच्छेदलक्षणः अकृत्रिमो हि संबंधो विशेषणविशेष्यवदिति
गर्गो यो इति वस्तुस्थितिः सा तस्यापि पौत्रत्वमवश्यंभावि तस्यां च गोत्रसंज्ञायां गोत्राद्यूनीति वचनाद्यूनि प्रत्ययप्रसंगो गार्ग्याद्देवच यूनीष्यते समर्थानामिति यद्य

अप पौत्रप्रभृतेर्गोत्रसंज्ञायां यस्यापत्यं तस्य पौत्रप्रभृतिसंज्ञाकरणं पौत्रप्रभृतेर्गोत्रसंज्ञायां यस्यापत्यं विवक्ष्यते तस्य पौत्रप्रभृति गोत्रसंज्ञा भ
वतीति वक्तव्यं गर्गोपि हि कंचित्प्रति पौत्रः कुशिकोपि तत्र मा भूदिति तत्तर्हि वक्तव्यं न वक्तव्यं समर्थानां प्रथमाद्वेति वर्तते समर्थानां प्रथम
स्य पदस्य यत्पौत्रप्रभृतीति विज्ञायते जीवद्वंश्यं च कुत्सितं जीवद्वंश्यं च कुत्सितं गोत्रसंज्ञं भवतीति वक्तव्यं गार्ग्यस्त्वमसि जाल्म। वात्स्यस्त्वमसि
जाल्म। का पुनरिह कुत्सा पितरि लोके व्यपदेशवता अस्वतंत्रेण भवितव्यं यद्दृशं नीपितमान् स्वतंत्रो भवति स उच्यते गार्ग्यस्त्वमसि जाल्मं न
त्वं पितरं नो व्यपदेष्टुमर्हसीति जीव जीवति तु वंश्ये युवेति पौत्रप्रभृत्यपेक्षं च जीवति तु वंश्ये युवेति पौत्रप्रभृत्यपेक्षं चेति वक्तव्यं तत्तर्हि वक्तव्यं पौ
=वस्तुस्थितिस्ता सत्यस्त्वेन गर्गशब्दस्यार्थ इत्यन्वयः। सत्रे अपत्यशब्देनापत्यत्वेन बोधविषयउच्यते।९= ९त्रप्रभृतीति वर्तते एवं तर्हि अन्वाचष्टे॥ ॥यं॰नवक्तं॰१॥

प्यपत्यस्य वृद्धस्य संबंधिशब्दत्वेन चोद्यमेतत्सरिद्रूपतेनन हि गर्गो शब्दस्यापत्यत्वं सदपि वस्तुस्थितिसाध्ये इति तथापि परिहारान्तरमुद्भाव्य कोसेनेत नोक्तं जीवद्वंश्यमिति सूत्र
न स्व कुत्सायामिति सूत्रमनार्षमितिवचनं न तं पितरत इति पितृव्यपदेशो हि गार्ग्यायण इति भाव्ये जीवति अभिजनप्रबंधो वंशः तत्र भवो वंश्यः पित्रादिस्तस्मिञ्जी
वति यस्य संज्ञेष्यते न सन्निदिष्ट इत्यपत्यमात्रस्य युवसंज्ञाप्राप्नोतीति मत्वाह पौत्रप्रभृत्यपेक्षं चेति इदं संज्ञाविधानमित्यशेषः पौत्रप्रभृतीत्यधिकारं वि गा॰म॰
९९शेषणमपत्यस्यापत्यस्य युवसंज्ञाविधौ यतेः पौत्रप्रभृतेरपत्यं तद्युवसंज्ञमित्यर्थः॥ ॥ ॥ ७०

अनंतरमिति अनंतरस्य च युवसंज्ञायां पण्स्त्रियार्षे इति लुक्प्रसंगः इतरः पौत्रप्रभृति यदपत्यमिति सामानाधिकरण्येन संबंधं मन्यमानः देवदत्तस्येति आचार्यदे
शीयमाह न पौत्रप्रभृतीति चोदकमाह एवमपीति भ्रातरीति भ्रातरीत्यनेन वंश्यस्य निवृत्तिः तेन तद्विशेषणस्यापि पौत्रप्रभृतिग्रहणस्य निवृत्तौ ज्यायसि
भ्रातरि जीवति अनंतरापत्यस्यापि कनीयसो युवसंज्ञाप्रसंग इत्यर्थः कथं तर्हीति एतच्चेहार्थादपत्यग्रहणाल्लभ्यते अन्यथा पौत्रप्रभृतेरपत्यस्यापि

६
पौत्रप्रभृतीति वर्ततइति किमेतस्यान्वाख्याने प्रयोजनं तच्चैवमर्थं देवदत्तस्यापत्यं दैवदत्तिः इति अनंतरं यदपत्यं तत्र युवसंज्ञा मा भूदिति देवदत्तस्य त
र्हि पौत्रे युवसंज्ञा प्राप्नोति। एतदपि पौत्रप्रभृति भवति न पौत्रप्रभृतीत्यनेनापत्यमभिसंबध्यते पौत्रप्रभृति यदपत्यमिति किं तर्हि वंश्योभिसंबध्यते
पौत्रप्रभृति वंश्ये जीवति यदपत्यमिति एवमपि देवदत्तस्य द्वौ पुत्रौ तयोः कनीयसि युवसंज्ञा प्राप्नोति भ्रातरि च ज्यायसीति एवं तर्ह्यपत्यमेवा
भिसंबध्यते न तु पौत्रप्रभृतिसमानाधिकरणमपत्यं नैवं विज्ञायते पौत्रप्रभृति यदपत्यमिति कथं तर्हि पौत्रप्रभृतेर्यदपत्यमिति वृद्धस्य च पूजा
यां वृद्धस्य च पूजायां युवसंज्ञा वक्तव्या। तत्रभवंतो गार्ग्यायणाः तत्रभवंतो वात्स्यायनाः का पुनरिह पूजा युवत्वं लोके ईप्सितं पूजेत्युपचर्यते तेन तत्र
भवंतो युवत्वेनोपचर्यमाणाः पूजिता भवंति आपत्यो वा गोत्रं ॥ अथ वा आपत्यो गोत्रसंज्ञो भवतीति वक्तव्यं परमप्रकृतेरपत्यं परमप्रकृते
आपत्यो भवतीति वक्तव्यं। आपत्याज्जीवद्वंश्यापत्यार्थे द्वितीयो युवसंज्ञः। आपत्याज्जीवद्वंश्यापत्यार्थे द्वितीयः प्रत्ययो वक्तव्यः युवसंज्ञा भवतीति
वक्तव्यं सत्यास्त्रियां सत्यास्त्रियां भवतीति वक्तव्यं एको गोत्रग्रहणमनर्थकं च एवं च कृत्वा एको गोत्रग्रहणमनर्थकं भवति बहुवचनलोपि
१८ युवत्वमिति कुंभे वतितत्र विदानामपत्यम्याणवक इति विगृह्य विदशब्दाद्घकयोर्हसन्निर्भविष्यति।
चार्थादनर्थकमेवापत्यग्रहणं स्यात् वृद्धस्येति सत्येषु तु वृद्धस्य च पूजायामिति कैश्चिद्दूर्तिकरणे नात्राक्षिप्तं गार्ग्यायणा इति युवसंज्ञाविधानसामर्थ्यात्स्वार्थे युव
प्रत्ययः युवत्वमिति ननु युवशब्दो न प्रेक्षितप्रवृत्तिनिमित्त एव संज्ञेति कथमेतदुच्यते प्रायेणाल्पवयसो जीवद्वंश्यत्वं संभवतीति तदध्यारोपः पूजेत्यर्थे आपत्यो

=कृत्सार्वधातुकानां समावेशः सार्वधातुकार्धधातुकयोश्च समावेशः ॥३=

भा०कै०४ ७१

वान्यस्मिन् सपिण्डे स्थविरतरे जीवति । अन्यथा पूर्वेणानिसायां युवसंज्ञायां प्राप्तायामियं विभाषा स्यात् । उभयत इति ज्यायसी सत्तु वसावयः प्रकर्षेण लब्धे स्थविरतर इति वच नसामर्थ्यादुभयनिमित्तः प्रकर्ष आश्रीयते जीवत इति जीवती सा ख्यात पदं संज्ञिविशेषणार्थमिहोपात्तमित्यर्थः मृते हीति संज्ञिनि सपिण्डे चेति भावः । अथेति ए कसंज्ञाधिकारादन्यत्र तसमावेशस्य दर्शनादेशो नाम्नो प्रश्नः या स्कायनय इति यस्कस्यापत्यं गोत्रमिति शिवाद्यण् । तदन्ताद्यूनि अण् च इति फिञ् । एकदेश

वैदः वैदो वैदस्यापत्यं वहवोमाणवकाः इति विदशब्दाद्दृष्टत्वनिमित्तं भविष्यति विदा इति वान्य अन्यग्रहणं किमर्थं भ्रातरीति वर्तते सपिण्डमात्रे यथा स्यात् । अथ स्थविरतरग्रहणं किमर्थं उभयतो विशिष्टे यथा स्यात् स्थानतो वयस्तश्च अथ जीवतीति वर्तमाने पुनर्जीवतिग्रहणं किमर्थं जीवतो जीवति यथा स्यात् मृते हि माभूत् न्यतेहि गार्ग्यो मतः इत्येव भवितव्यं । अथ गोत्रयूनोः समावेशो भवति उताहो न । किं चेतः प्राप्नोति वा । इ । प्राप्नो ति न ह्ययमेकसंज्ञाधिकारः । किं चातः गोत्रयूनोः समावेशको दोषस्तत्र कृतं भवेत् गोत्रयूनोः समा [redacted] वेशे को दोषः । तत्रह

यू४ तं प्राप्नोति गोत्राश्रया विधयो न्यपि प्राप्नुवं तिया स्कायनयः यस्कादिभ्यो गोत्र इति लुक् प्राप्नोति । यस्कादिषु न दोषोस्ति न यूनीत्यनुवर्तनात् । यस्का दिषु न दोषः । न यूनीत्यनुवर्तनात् । न यूनीति तत्रानुवर्तते । कथं कृत्वा । न तौल्वलिभ्य इति ॥ दोषो ऽत्रि विद पंचाला न यूनीत्यनुवर्तनात् यदि न यूनीत्य नुवर्तते अत्रयः विदाः पंचाला माणवका इति न सिध्यति नैष दोषः संबंधमनुवर्तिष्यते न तौल्वलिभ्यस्तत्राजस्य बहुषु तेनैवास्त्रियां लुग्भवति तौल्व लिभ्यो यूनि न यस्कादिभ्यो गोत्रे लुग्भवति तौल्वलिभ्य इति निवृत्तं । यत्र जो ऽस्त्री अत्रिभृगुकुत्सवसिष्ठगोतमाङ्गिरोभ्यश्च लुग्भवति यूनि नेत्यपि निवृत्तं ॥

×यूनिन० ४×

विकृतस्यानन्तरादत्रेयस्येति लोपे च यास्केतिशब्दोयस्क एवेति लुक् प्राप्नोति न यूनीति तत्र वाक्यभेदेन संबंधोयस्कादिभ्यः परस्य गोत्रप्रत्ययस्य बहुषु लुग्भवति यूनि तु न भवतीति अत्रय इति अत्रेर्गोत्रे इतश्चानिञ इति ढक् विदा अंपंचाला जनपदशब्दादित्यञ् तेनो बहुषु युवसु तद्राजतस्य एव क्षत्रियाद्येति लुक् किं लेत्यागतो लुगि ष्यते स न यूनीत्यनुवर्तनान्न प्राप्नोति संबंधमिति तेन यस्कादिभ्यो गोत्र इत्यत्रैव न यूनीति संबध्यते नान्यत्रेत्यर्थः ॥ ॥ ॥ ॥ राम० ७१

६१

इह तर्हीति यद्यपि हितेऽपि पराधान्यात्प्रकृतिः स्वत्वे नाल्पएव प्राधान्यात्परः प्रकृभवतीति गोत्रसंज्ञाया मप्रसंगः। विहितविशेषणा पक्षाश्रयेणपरिहारमाह कण्वादिभ्य इति क-
ण्वादिभ्यो गोत्रेयः प्रत्ययो विहितस्तदन्तात्प्रातिपदिकाच्छैषिकेर्थेण् प्रत्यय इति सूत्रार्थाश्रयेण दोषाभाव इति प्रतिपदमिति एको गोत्र इति नियमादप्राप्नोति यून्यपरः प्रत्ययो
विधीयत इत्यर्थः तदन्तात्त हीति यद्येको गोत्र इति नियमो बाध्यते तदौपगवेर्यूनोऽपत्यमित्यत्रापि यूनो गोत्रत्वे सति नियमेनोत्पद्येतिफ़ प्रसंग इत्यर्थः गोत्रादिति

इह तर्हि कार्ण्यायनस्य छात्राः कार्ण्यायनीयाः कण्वादिभ्यो गोत्र इत्यण् प्राप्नोति कण्वादिषु न दोषोऽस्ति न यून्यस्ति ततः परं क-
ण्वादिषु दोषो नास्ति किं कारणं न यून्यस्ति ततः परं कण्वादिभ्यो यो विहितः तदन्तात्प्रातिपदिकादित्युच्यते यस्मात्र कण्वादि-
भ्यो विहितः न तदन्तं प्रातिपदिकं यदन्तं च प्रातिपदिकं नासौ कण्वादिभ्यः परः। इह तर्ह्यौपगवस्यापत्यमौपगविरिति एको गोत्र इत्येत-
स्मान्नियमात्प्रत्ययो न प्राप्नोति एको गोत्र इति परं प्रतिपदमत्र प्रत्यया विधीयन्ते गोत्राद्यून्यस्त्रियामिति तदन्तान्न स्यादनेकः
प्रत्ययः प्राप्नोति गोत्राद्यूनि च तत्स्मरेत्॥ गोत्राद्यून्यस्त्रियामितिति स्मरेत् किं एक इत्येव गोत्रे न स्यात्तु गुण्कः स यून्यपि
प्राप्नोति उपस्तु पुनर्यूनि लुग्भविष्यति नैवं शक्यं एकस्मिन्नो दोषः स्यात्॥ श्री ॥७॥

गोत्राद्यूनीत्यत्रैकग्रहणमनुवर्तते। तेनैकस्मैवयुवप्रत्ययस्यानुज्ञानादनेकः प्रत्ययो न भविष्यतीत्यर्थः। यद्यप्याद्यस्य युवप्रत्ययस्य यूनि लुगिति लुकि कृते इ-
ष्टं सिध्यति तथापि परिहारान्तरसंभवादेतन्नाश्रितं यूनस्यपीति औत्रीणां यूनां छात्रा इत्यादावितिप्रयोजनार्थः पुनरिति पाठात्तलुकं वाधित्वा लुग्भविष्यतीत्यर्थः॥

=अत्रीणामिति॰ अत्रिशब्दादपत्यादिति ढक्रि तदन्ताद्युवबहुत्वे तद्राजितस्याण्यप्रत्यये इति लुकि एकवचनद्विवचनान्तस्य अहत्वो बहुषु लोपो यूनीत्यत्रिभृगुकुत्सेति ढको लुकि अत्रीणामिति भवति॰ अत्र प्रागदीव्यतो ऽचा=
=ादिप्रसपविवक्षायामलुग्भिः प्रसज्येत एवं च ढगंतस्य बहुत्वे वर्तमानाद्गोत्रापवादे बहुत्वेप्याणि आत्रेयाद्रितिस्यात् इगोलु ढितुक कोपिलुकि प्रत्ययलक्षणेनेञन्तत्वात्फणि आत्राइतिभवति॰१=

भा०कै०४ शालङ्केरिति शालङ्केरपत्यं गोत्रमिति वा ह्वादेराकृतिगणत्वादिञ् पैलादिषु शालङ्किशब्दपाठान्निपातनाद्वेत्रप्रत्ययश्च शालङ्कादेशश्च । ततः शालङ्केरपत्यं युवेति यञि

७२ ञोऽश्चेति फक्रस्य पैलादिभ्यश्चेति लुक् ततः शालङ्केर्यूनश्छात्रा इति प्राग्दीव्यतीयार्थविवक्षायां यूनो गोत्रसंज्ञायां सत्यां पैलादिषु लुको गोत्रे लुगचीत्यलुग्बाधकं

स्यात् तस्यापि यूनि लुगिति प्रबलालुक्‌बाधकस्तस्यापि फक्‌फिञोरन्यतरस्यामिति विकल्प इति पक्षे तु फकः श्रवणप्रसंगः यदा तु यूनो गोत्रसंज्ञा नास्ति

शालङ्केर्यूनः छात्राः शालङ्काः पैलस्य पैलीयाः फक्‌फिञोरन्यतरस्यामित्यन्यतरस्यां श्रवणं प्रसज्येत तस्मात् युवसंज्ञायां गोत्रसंज्ञायाः प्रतिषेधो व
क्तव्यः न वक्तव्यः तुल्ल्यामकं तु क्रियते स नियामको भविष्यति जीवति तु वंश्येऽपत्ये युवसंज्ञमेव भवतीति यदि तर्हि युवसंज्ञायां गोत्रसंज्ञा न भ
वति यद्येवं ते यूनि गोत्राश्रया विधयस्ते न सिध्यंति गार्ग्यायणानां समूहो गार्ग्यायणकं गार्ग्यायणानां किंचिद्गार्ग्यायणकं गार्ग्यायणो भक्ति
रस्य गार्ग्यायणकः गोत्राश्रयो वुञ् न प्राप्नोति एवं तर्हि राजन्याद्युन्मनुष्याद्वुञ्ज्ञापकं लौकिकं परं यदयं वुञ्विधौ राजन्यमनुष्ययोर्ग्रहणं करोति
तत् ज्ञापयत्याचार्यः लौकिकं परं गोत्रग्रहणमिति यथा च लोके गोत्रमित्युपचर्यते किंगोत्रोऽसि माणवक गार्ग्यायणः किंगोत्रोऽसि माणवक वात्स्या
यनः यद्येतज्ज्ञाप्यते औपगवे यूनः छात्रा औपगवीयाः इञो गोत्रे इत्यण् प्राप्नोति सामूहिके गुरुतापकं परिसामूहिके गुरुतापकं गार्ग्यायणानां किं
चिद्गार्ग्यायणकं गार्ग्यायणो भक्तिरस्य गार्ग्यायणकः गोत्राश्रयो वुञ् न प्राप्नोति वुञ्विधौ ज्ञापकं वुञ्विधावेव तत् ज्ञापकं परिवुञ्विधौ शालङ्के

तरां गोत्रेऽलुगचीत्यस्य प्रवृत्तौ पैलादिभ्यश्चेति लुग्भवत्येव ततः कण्वादिभ्यो गोत्रे इत्यण्प्रसज्येत इति शालङ्का इति भवति फक्‌फिञोरन्यतरस्यामित्यपि च विकल्पो
ने तस्य यूनि लुगित्यस्यैव बाधकः ननु पैलादिलुको व्यवहितत्वात् अंगस्य च पैलीया इति पीलाया अपत्यं गोत्रं पीलाया वेत्यण् ततो यून्यपत्ये इञश्चेति फिञ् तस्य पै एम०
लादिभ्यश्चेति लुक् ततो वृद्धाच्छः तुल्ल्यामक इति अनेकार्थत्वान्निपातानामवधारणार्थत्वात् त्रावृत्त ॥ ॥ श्री ॥ ७२

जनपद एकराजादिति एकस्मात्सौराजात्क्षत्रियएकराजः ते नैकक्षत्रियवाचिन एव प्रत्ययो भवति ननु बहुलसंख्यायुक्तक्षत्रियवाचिन इत्यर्थः यथैवैकः क्षत्रियः पंचालस्तथैव बहवः क्षत्रियाः पंचाला इति प्रत्ययप्रसंगे वचनमिदं न ह्यंतरेणेति पंचालाः प्रत्येषु योगिकः पंचालशब्दस्तद्राजस्याञो बहुषु लुक्प्रत्यात् तस्य लुगेति एषक्षत्रियार्थेऽञित इत्यनेन तस्मिंश्चेति गोत्रे लुगचीत्यनेन यद्येवं पांचाल इति सद्वचनाभावान्मिति किं वार्तिकारंभेण तत्र वार्तिककारस्याभिप्रायमाह अस्ति वार्तिकारंभे बहुवचनान्तादेव प्रत्ययः स्यात् नैकवचनान्तात् जनपदे हि बहुवचनांतः पञ्चालशब्दो वर्तत इति तस्यैव ज

इञो गोत्र इत्यण् न प्राप्नोति अस्त्येतस्य विशेषेण कथमौपगवे यूनः छात्राः औपगवीयाः इञो गोत्र इत्यण् न प्राप्नोति नैष दोषः गोत्रेणाजेऽविशेषयिष्यामः गोत्रे य इञ् विहित इति 'जनपद' क्षत्रियादेकराजात्संघप्रतिषेधार्थं क्षत्रियादेकराजादिति वक्तव्यं किं प्रयोजनं संघप्रतिषेधार्थं संघान्माभूत् पंचाला नाम प्रत्यं विदेहा नाम प्रत्यमिति तत्तर्हि वक्तव्यं न वक्तव्यं न ह्यंतरेण बहुषु लुक् पंचाला इत्येतत् भवति यस्तस्मादुत्पद्यते युवप्रत्ययः स स्मात् युवप्रत्ययश्चेत् तस्य लुक् तस्मिंश्च लुग्भविष्यति इदं तर्हि क्षौद्रकाणामपत्यं मालवानामपत्यमिति अत्रापि क्षौद्रक्यो मालव्य इति नैतत्तेषां दासे वा भवति कर्मकरे वा किं तर्हि तेषामेव कस्मिंश्चित् पावतातेषामेव कस्मिंश्चित् यस्तस्मादुत्पद्यते युवप्रत्ययः स स्मात् युवप्रत्ययश्चेत् तस्य लुक् तस्मिंश्च लुग्भविष्यति अथ क्षत्रियग्रहणं किमर्थं इह माभूत् विदेहो नाम ब्राह्म

नपद समानशब्दत्वं क्षत्रियवृत्तित्वं च 'भाष्यकारस्य मन्यते प्रातिपदिकस्य जनपदसमानशब्दत्वं याद्यं न सुबंतस्येत्येकवचनान्तात्प्रत्ययः केन निवार्यत इति इदं तर्हीति क्षौद्रकस्य राज्ञो भ्रातापि क्षत्रियाः क्षौद्रका उच्यंते तत्र स्वार्थापत्यसंबंधाभावाद्गोत्रयुवप्रत्ययकार्याभावादनिष्पन्नमेतत्पिति तद्राजोऽन्य उच्यते प्रोनीत्यर्थः नैतदिति मुख्यापत्यदासादिषु समावारोपवरितार्थान्प्रत्ययाद्दर्शनान्नात्रेदोष इत्यर्थः॥ ॥ श्री ॥

भा०कौ०४
७२

प्रत्येोरिति सिद्धेप्राग्दीव्यतीयेणिति द्व्राजसंज्ञार्थमिदं वचनं पूरुशब्दो नजनपदवाची अन्यपाद्य म्गधे त्वणः सिद्धत्वाद्वचनमनर्थकं स्यात्पाण्डोरीरिति वा

क्षत्रियग्रहणानर्थक्यं चोक्तं किमुक्तं एकं तावदुक्तं बाह्वादिप्रभृतिषु येषां दर्शनं गोत्रभावे लौकिके ततोन्यत्र तेषां प्रतिषेध इति अपरमुक्तं
अनभिधानादिति क्षत्रियसमानशब्दाज्जनपदात्तस्य राजन्यपत्यवत् क्षत्रियसमानशब्दाज्जनपदात् तस्य राजन्यपत्यवत् प्रत्यया भवंतीतिव
क्तव्यं पंचालानां राजा पांचालः पूरोरण्वक्तव्यः पौरवः पांडोर्ड्यण्वक्तव्यः पांड्यः द्व्यञ्मगध अणो ञ्यङ् ण्येञो विप्रतिषेधेन अणः
ञ्यङ् ण्य इञ् इत्येते भवंति विप्रतिषेधेन अणोऽवकाशः आंगः वांगः ञ्यङोऽवकाशः आंबष्ठ्यः सौवीर्यः इहोभयं प्राप्नोति दार्व्यः
ण्यस्यावकाशः नैचक्यः नैचक्यः अणः स एव इहोभयं प्राप्नोति नीपा नैप्यः इञोऽवकाशः आजमीढिः आजक्रंदिः अणः स ए
व इहोभयं प्राप्नोति बुधे बौधिः ञ्यङ् ण्येञो भवंति विप्रतिषेधेन ञ्यङः कुरुणादिभ्यो ण्यः ञ्यङः कुरुणादिभ्यो ण्यो भवति विप्रति
षेधेन ञ्यङोऽवकाशः आवंत्यः कौंत्यः ण्यस्य स एव वैशो नाम जनपदः तस्मादुभयं प्राप्नोति ण्यो भवति विप्रतिषेधेन वैश्यः कं
बोजाः कंबोजादिभ्यो लुग्वचने चोलाद्यर्थं कंबोजादिभ्यो लुग्वक्तव्यः किं प्रयोजनं चोलाद्यर्थं चोलः कडेरः केरलः अतश्च इ
हकस्मान्न भवति आंबष्ठ्या सौवीर्या॥ अत इत्युच्यते न चैषोऽकारः तदंतविधिना प्राप्नोति अत उत्तरं पठति अत इति तदंताग्र
हणमवंत्यादिभ्यो लुग्वचनात् [redacted] ॥ ॥

ह्वादिप्रभृतिषु येषां दर्शनं लौकिके गोत्रभाव इति वचनात् युधिष्ठिरादिपितुः पांडोरग्रहणात्तद्वाचिनः पांडव इत्येव भवति द्व्यञ्मग दार्वेइति दार्व्यस्यापत्य

एम०
७३

पर्श्वीरिति पर्शोरपत्यं स्त्री द्व्यञ्मगधेत्यणतस्यात श्चेति लुक् पर्श्वादियौधेयादिभ्यामणञाविति स्वार्थे ऽण् । तस्मिंश्च मकाराणाल्लुगप्राप्नो वचनेन विधीयते ततऊङ् । तर्
क्षूङ् रक्षाङ् इति रक्षसः क्षत्रियविशेषस्यापत्यं स्त्री निःशूर्वेवदस्य लुकि कृते स्त्रियाः अभिधायकात्तु लोपे दीर्घत्वे च रक्षा इति भवति रक्षश्स युक्तः पाठः असुरीति असुरश
ई स्त्रियामपत्ये ऽण् लुक् ततो ऽण् जातिलक्षणो ङीष् यौधेयादिप्रतिषेध इति यदि पांचमिकस्यापि तद्राजस्यात श्चेति लुक् न स्यात् तदा यौधेयादिभ्यो विहितस्याणो
ओ२

अत इतिनदं तस्याग्रहणं किंकारणं अवंत्यादिभ्यो लुग्वचनात् यदयमवंत्यादिभ्यो लुकं शास्ति तज्ज्ञापयत्याचार्यः नात्र तदंतविधि भ
वति पर्श्वादिभ्यो लुग्वक्तव्यः पर्शूः रक्षाः असुरी यौधेयादिप्रतिषेधो ज्ञापकः पर्श्वादिलुकः यदयं न प्राच्यभर्गादियौधेयादिभ्य इति
प्रतिषेधं शास्ति तज्ज्ञापयत्याचार्यः भवति पर्श्वादिभ्यो लुगिति ॥ ॥ इति भगवत्पतंजलिविरचिते व्याकरणमहाभाष्ये चतुर्थ
स्याध्यायस्य प्रथमे पादे चतुर्थमाह्निकम् ॥ ॥ पादश्च समाप्तः ॥ ॥

लुक्प्रतिषेधविधान[redacted]मनपेक्षमेवस्यादिस्यर्थः पृथाया अपत्यं स्त्री द्व्यच इति ठक् ततः स्वार्थे ऽञ् तस्य लुकि प्रतिषिद्धे ऽञंतलक्षणो ङीन्निवृत्ते यौधेयीति
भवति यदि लञो लुक् स्यात् तदा ठगंतलक्षणो ङीप् स्यात् उदात्तनिवृत्तिस्वरः स्यात् इत्युपाध्यायजय्यटपुत्रकैयटकृते भाष्यप्रदीपे चतुर्थाध्यायस्य प्रथमे पा
दे चतुर्थमाह्निकम् ॥ ॥ श्री ॥९॥

= ननु रक्तादीनामर्थाभिधाने प्रत्यर्थेन समासो नुपपन्नः सविशेषणत्वेनासामर्थ्यादिति अत आह रक्तेति शब्दपरत्वे तु नित्यसापेक्षत्वात्समासः प्रतिभावः ॥१ =

भा°

भा° कै° ४ ॐ तेन रक्तं रागात् रक्तादीनामिति रक्तादीनां शब्दानां योर्थः स एव परित्यौकिके प्रयोगे प्रत्ययेनाभिधीयते तेन तदा प्रत्ययो भवति नान्यथा अप्रयुक्तानां शब्दानां साध्व

७४ साधुविवेकाय शास्त्रारंभः देवदत्तेन रक्तं वस्त्रमिति वाक्याद्यो र्थोवगम्यते नासौ दैवदत्तं वस्त्रमित्यतो वगम्यते स्वस्वामिसंबंधस्यैवातः संप्रत्ययात् न च वा न

भिधानात् को येन रक्तं मुखं कपोलकांतायां रक्तः इत्यादौ वर्णाभिधा ॥ ३ यो न भविष्यति मत्वर्थः लाक्षा ठक् प्रकरणे इति शकलकर्दमयोः सूत्रे पाठो नार्थः

तेन रक्तं रागात् रागादिति किमर्थम् देवदत्तेन रक्तं वस्त्रम् रक्तादीनामर्थाभिधाने प्रत्ययविधानादुपाध्यानर्थकम् रक्तादीनामर्थाभि

धाने प्रत्ययविधानादुपाधिग्रहणमनर्थकम् न ह्य रागाद्युत्पद्यमानेन प्रत्ययेनार्थस्याभिधानं स्यात् अनभिधानात्तत उत्पत्तिर्न भविष्यति

लाक्षारोचनाट्ठक् ठक्प्रकरणे शकलकर्दमाभ्यामुपसंख्यानम् ठक्प्रकरणे शकलकर्दमाभ्यामुपसंख्यानं कर्तव्यं शाकलिकं कार्दमिकं नी

ल्या अन् नील्या अन्वक्तव्यः नील्या रक्तं नीलम् पीतात्कन् पीतात्कन्वक्तव्यः पीतेन रक्तं पीतकम् पीतकशब्दो वा प्रकृत्यंतरं तस्मात्स्व

र्थे कः हरिद्रामहारजनाभ्यामञ् हरिद्रामहारजनाभ्यामञ्वक्तव्यः हारिद्रं माहारजनं रागादित्युच्यते तत्रेदं न सिध्यति हारिद्रौ

कुक्कुटस्य पादौ काषायौ गर्दभस्य कर्णाविति उपमानात्सिद्धम् हरिद्रे इव हारिद्रौ काषाया इव काषायौ ॥ ० ॥ ॥

नील्या इति ओषधिविशेषो नीली अणेवाधानार्थं वचनं नीलशब्दस्तु गुणगुणिनोरभेदोपचारान्मतुब्लोपाद्वा नीसारक्तेव वस्त्रे सिध्यति पीतादिति एम°

रागविशेषवाची पीतशब्दः प्रकृत्यंतरमिति स्वार्थिककप्रत्ययान्तमित्यर्थः उपमानादिति रूपसादृश्यनिमित्तादित्यर्थः ॥ ॥ ७४

= पूर्वमते तेनादनभिधानान्न प्रत्ययः अत्र मते पीतशब्दस्याभिधानं बोध्यं ॥१ =

= एवं सतीति । सर्वस्य कालस्य पुष्यसंबद्धत्वात् कालविशेषावगतावसत्यां तदवगमार्थः प्रयोगो न स्यादिति भावः ॥२=

नक्षत्रे योगो हीति । प्राप्तिपूर्विका प्राप्तिर्योगः स कालनक्षत्रयोर्नास्ति द्वयोरपि नित्यत्वात् न च चंद्रमसैव योगः पुष्यादीनां नक्षत्राणां सर्वदा तेषां लोके नक्षत्रे व्यवहारदर्शनात् अथापि संबंधमात्रं योगः स च नित्यानामपि प्रधानपुरुषवदविरुद्धः तथापि कालविशेषावगमार्थः पौषादिशब्दप्रयोगः एवं सत्यसत्यां कालविशेषावगतौ न स्यात् तद्युक्तादिति नक्षत्रयुक्तचंद्रवाचिनः काले ऽभिधेये प्रत्ययो विधेय इत्यर्थः चंद्रनक्षत्रयोस्त्वविमुक्तत्वादस्ति कादाचित्को योगः । काल

नक्षत्रेण युक्तः कालः । अयुक्तोयं निर्देशः योगो हि नाम भवति ययोः संनिकर्षविप्रकर्षौ स्तः न च कालनक्षत्रयोः संनिकर्षविप्रकर्षौ स्तः [redacted] नित्ये हि कालनक्षत्रे । कथं तर्हि निर्देशः कर्तव्यः नक्षत्रेण चंद्रमसो योगात् तद्युक्तात्काले प्रत्ययविधानं । नक्षत्रेण चंद्रमसो योगात् तद्युक्तात्काले प्रत्ययो भवतीति वक्तव्यम् पुष्येण युक्तः पुष्ययुक्तश्चंद्रमा अस्मिन् काले पौषमहः पौषी रात्रिः तत्रोत्तरपदलोपः तत्रैवं सति उत्तरपदलोपो वक्तव्यः पुष्ययुक्तशब्दाद्धि प्रत्ययो विधीयते लिंगवचनानुपपत्तिश्च लिंगवचनयोश्चानुपपत्तिः चंद्रमसो यल्लिंगवचने तद्युक्तवद्भावेन प्राप्नोति कालयोगात्सिद्धं अस्तु नक्षत्रेण युक्तः काल इत्येव । ननु चोक्तमयुक्तोयं निर्देशः योगो हि नाम भवति ययोः संनिकर्षविप्रकर्षौ स्तः न च कालनक्षत्रयोः संनिकर्षविप्रकर्षौ स्तः नित्ये हि कालनक्षत्रे इति नैष दोषः पुष्यसमीपगते चंद्रमसि पुष्यशब्दो वर्तते । तेन तत्संबंधेन कालो विशेष्यते तथा च संप्रत्ययः एवं च कृत्वा लोके संप्रत्ययो भवति पुष्यसमीपगते चंद्रमसि वक्तारो भवंति पुष्येण द्य

=भाष्यमिति शेषः ॥१=

स्तनि सोमापी चेति योगाभावः लिंगेति मघायुक्तशब्दात् प्रत्यये क्रियमाणे तस्य च लुपि सति मघा इति स्त्रीत्वबहुत्वे न सिध्यत इत्यर्थः कालयोगादिति कालस्यैव पुष्यादिसमीपस्थेन चंद्रमसा योगः आश्रीयत इत्यर्थः पुष्यसमीपगत इति मुख्यार्थासंभवे गौण्यास्याश्रयणादिति भावः मघादयः शब्दा अपरिसमाप्तलिंगसंख्या एव चंद्रमसि वर्तन्ते । यथा मंचारयो मंचौ ह्रियः पश्येति तेन युक्तवद्भावेपि दोषाभावः ॥ ॥

= आश्रीयत इति । एवं चानित्यसंबंधेन नक्षत्रयुक्तचंद्रेण कालस्य संबंधो ऽनित्य एवेति नित्येन चंद्रमसा [illegible] कालविशेषावगतिरिति द्रष्टव्यं निरसनीयं ॥२=

लव अविशेषस्वरूपदर्शनाय प्रश्नप्रतिवचने इहेति पौषमहरिसहविशेषानवगमादस्य विशेष इति लुप्प्रसंगः 'अहोरात्र इति तेनाहोरात्रस्य दर्वात
रात्र्याद्यवयवविशेषाविवक्षा तदा लुप् विशेषविवक्षायां तु श्रवणं पौषोहोरात्र इत्यत्रापि विशेषस्य शब्देनाश्रितत्वाल्लुबभावः 'दृष्टं' कलिना दृष्टमि

×दिवेत्युक्ते नज्ञायते कदेति××

लुबविशेषे इह कस्मान्न भवति पौषी रात्रिः पौषमहः अविशेष इत्युच्यते विशेषश्चात्र गम्यते रात्रिरित्युक्तेऽहर्नेति गम्यते अहरित्युक्ते
रात्रिर्नेति गम्यते इहापि तर्हि न प्राप्नोति अद्य पुष्य इति अत्रापि हि विशेषो गम्यते अद्येत्युक्ते न ज्ञायते न श्व इति यद्यप्यत्र विशेषोग
म्यते अविशेषोपि गम्यते अद्येत्युक्ते न ज्ञायते रात्रौ वा दिवा वेति यतोऽविशेषस्तदाश्रयो लुब्भविष्यति इहापि तर्हि यद्यपि विशेषो गम्य
ते अविशेषोपि तु गम्यते। रात्रिरित्युक्ते न ज्ञायते कदेति यतो विशेषस्तदाश्रयो लुप् प्राप्नोति एवं तर्हि नक्षत्रेण युक्तः काल इत्यनु
वर्तते नक्षत्रेण युक्तस्य कालस्याविशेषः कः पुनः कालो नक्षत्रेण युज्यते अहोरात्रः। संज्ञायां श्रवणाश्वत्थ' इह कस्मान्न युक्तवद्भावो
भवति श्रवणा रात्रिः निपातनादेतत्सिद्धं किं निपातनं विभाषा फाल्गुनीश्रवणाकार्त्तिकीचैत्रीभ्य इति' दृष्टं साम' दृष्टं साम कलेठक्
दृष्टं सामेत्यत्र कलेर्ढग्वक्तव्यः [redacted] कलिना दृष्टं साम कालेयं साम गीयते अपर आह सर्वत्राग्निकलिभ्यां ढक् सर्वत्राग्निकलिभ्यां
ढग्वक्तव्यः अग्निना दृष्टं साम आग्नेयं अग्नेरागतं आग्नेयं अग्नेः स्वम् आग्नेयं अग्निर्देवतास्य आग्नेयः कलिना दृष्टं साम कालेयं कालेरागतं कालेयं कलेः
स्वं कालेयं कलिर्देवतास्य कालेयश्चरुः॥ ॥ ॥ ॥

ति यस्य सामनादि। शिष्टकार्ये विषयो विनियोगो ज्ञानातिशयसंपत्साकलिना ज्ञापितं तेन दृष्टमित्युच्यते सर्वत्रेति सर्वेषु प्राग्दीव्यतीयेष्वर्थेष्वित्यर्थः
१ ॥ श्री ॥

जातेचेति जातेर्थेयोद्विरणिविधीयते पूर्वविप्रतिषेधेनबाधकेननिवर्त्तितः पुनर्विधीयत इत्यर्थः सर्वादिद्वृति शातभिषजीति शातभिषजायुक्तः कालइत्यण् तस्मिन्नुपतन्नो
सर जातेर्थे प्राग्दीव्यतोऽणित्यविहितः कालाट्ठञिति ठञा बाधितः पुनः सन्धिवेलादिसूत्रेणविधीयते तीयादीकगिति स्वार्थे निर्दिष्टस्तस्मात्स्वार्थ एवेति तेयं नविद्याया इति
विद्यावाचिनोनभवतीत्यर्थः गोत्रादिति यथांकेगोत्रप्रत्ययांतात्प्रत्ययः एवं दृष्टे साम्नीत्यर्थः औपगवकमिति गोत्रचरणाद्वुञिति वुञ् वाम। वाम

दृष्टे साम्नि जाते चाप्यणिड् द्विर्वा विधीयते दृष्टे साम्नि जाते च अणिड्द्विर्वा वक्तव्यः उशनसा दृष्टं साम औशनसं औशनं। शातभिषजि जातः शातभिषजः शातभिषः तीयादीकक् तीयादीकक् वक्तव्यः द्वैतीयकः तार्तीयकः नविद्यायाः विद्यायां न भवतीति वक्तव्यं द्वितीया विद्येत्येव गोत्रादंकवदिष्यते औपगवकं। दृष्टे साम्नि जाते चाप्यणिड् द्विर्वा विधीयते तीयादीकक् नविद्याया गोत्रादंकवदिष्यते वामदेवात् ड्यड्ड्यौ किमर्थो डकार इति नीतिलोपो यथा स्यात् नैतदस्ति प्रयोजनं यस्येति लोपेनाप्येतत्सिद्धं एवं तर्हि सिद्धे यत्नौ डितौ करोति तज्ज्ञापयत्याचार्यः भवत एते परिभाषे अननुबंधकग्रहणे न सानुबंधकस्य तदनुबंधकग्रहणे नातदनुबंधकस्य ग्रहणमिति किमेतस्य ज्ञापने प्रयोजनं वामदेव्यमित्येतत्सिद्धं भवति सिद्धे यस्येति लोपे न किमर्थं ययतौ डितौ ग्रहणं मा भूत् वामदेव्यस्य नञ्स्वरे परिहृतोरथ्यः परिहृतो रथ इति तदेकांतग्रहणं परिहृतोरथ्य इत्यत्र तदेकांतग्रहणं कर्त्तव्यं येन परिवृतो रथः इत्यैकांतत्वं तस्मिन् भवतीति वक्तव्यं इह मा भूत् पुत्रैः परिवृतो रथश्छात्रैः परीवृतो रथ इति। तन्नर्हि वक्तव्यं न वक्तव्यं कस्मान्न भवति पुत्रैः परिहृतो रथ इति॥ ॥

देवमिति अव्ययपूर्वपदप्रकृतिस्वरेणाद्युदात्तत्वमित्यर्थः अव्ययायतोऽनुदात्तदर्थे इत्यनेनांतोदात्तत्वं स्यात् ग्रहणमिति अत इत्ययं ग्रहणेन सूत्रे लक्ष्यते। नञ्स्वर इति नञाश्रयेणांतोदात्तत्वे विधीयमाने इत्यर्थः परि तदेकांतग्रहणमिति रथस्य चर्मवस्त्राद्यवयवा इति तद्व्याप्य एव प्रत्ययो भवतीत्यर्थः॥ ॥

मा०कौ०४ ७६ अनभिधानादिति पैत्रो रथइत्यादौ अभिधानस्याभावादित्यर्थः पांडुइतिनैनतइति आचानभिधानान्नभवतीति तदुक्तं नार्थमपीदं नवाच्यमित्यर्थः कौ
मा उभयतइति उभयस्मिन्नुभयतः यदि कौमारीति स्त्रियाम प्रयोगोऽथ कौमारः पतिरिति पुंसुभयत्रापि स्त्रियाः पा ग्रहणस्यापूर्वत्वे प्रयोगः कार्य इ णि२
त्यर्थः एतच्च निपातनसामर्थ्याल्लभ्यमेव वार्त्तिककृता प्रकाशितं अपूर्वपतिमिति अविद्यमानः पूर्वः पतिर्यस्यास्तां प्राप्त इत्यर्थः द्वितीयासमर्था त्कुमा

अनभिधानात् पांडुकं अयंयोगप्रत्याख्येयो वक्तुं कथं पाण्डुकं वली पांडुकंबलिनो पांडुकंबलिन इति इनिनैवतमत्वर्थीयेन सिद्धं पाण्डुकंब
लोऽस्यास्तीति पांडुकंबली कौमार कौमारापूर्ववचन इत्युभयत स्त्रियाः अपूर्वत्वे कौमारापूर्ववचन इत्यत्रोभयतः स्त्रियाः अपूर्वत्व इति वक्तव्यं
अपूर्वपतिं कुमारीमुपपन्नः कौमारो भर्त्ता कुमारी अपूर्वपतिः पतिमुपपन्ना कौमारी भार्या कौमारापूर्ववचने कुमार्या अप्रत्यभिधीयते अपूर्व =कौमारापूर्ववचनइतिसूत्रेकुमा=
त्वेपदार्थत्वस्याः कुमार्य्या भवतीति वा अथवा कुमार्य्या भवः कौमारः यद्येवं कौमारी भार्य्येति न सिध्यति पुंयोगात् अभिधानं पुंयोगस्याभि =मार्यापोपयमेऽणिधीयतेसर्वत्वस्या=
धाने भविष्यति कौमारस्य भार्या कौमारी सास्मिन्पौर्णमासीति संज्ञाग्रहणं सास्मिन्पौर्णमासीत्यत्र संज्ञाग्रहणं कर्त्तव्यं असंज्ञा =अपूर्वत्वंतनपुंसकत्वात् कुमार्यामि=
यां हि गरीयानुपसंयोगः अश्विपमाणेऽपि संज्ञाग्रहणे गरीयानुपसंयोगः कर्त्तव्यः स्यात् मासाद्वैमासयोरितिवक्तव्यं स्यात् इहमाभूत पौषी =वतीत्येनेनसूत्रप्रत्याख्यानं पो=
=उपयमनविशिष्टेस्वार्थेइत्यर्थः।१= पौर्णमासी अस्मिन्पंचदशरात्रेइति॥ ॥ ॥ =इकुमारीमुपपन्नस्तस्याप्यामसौ=
=भवतिनदापनतानज्ञर्मा चरण=
=देसनत्रतअभवइत्येवसिद्धं३=
रीशहा उपयन्तरयेपत्त्ययः स्त्रियां तु स्वार्थेप्रत्ययः कुमार्य्यां भव इति गोणादिषु तु यद्यभिधानं नास्ति तदानभिधानात्प्रत्ययाभावः कौमारस्य भार्येति प्रत्ययप्रत्ययैव
तस्य कौमारव्यपदेशनिबंधनं सैवाभिधीयते नान्या सास्मिन् संज्ञाग्रहणं सूत्रेऽनार्थमिति वार्त्तिकमाद्यं उपसंयोग इति उपसंयुज्यत इत्युपसंयोग उपाधिरिति राम०
त्युच्यते अनेक उपाधिर्निर्दिश्यः स्यादित्यर्थः॥ ॥ श्री ॥ ॥ ७६

= ततके नि० अ तकाः कर्मकरास्तेषां यो मासः कर्मकरणकारस्य त्रिंशद्दिनलक्षणः स यदा पौष्यां पौर्णमास्यां भवति वस्तुतस्तु न पौषादिमासस्य व्यपदेश आकस्मिक इति समुदायार्थः ।१=

संवत्सरपर्वणीति संवत्सरस्य द्वादशपर्वाणि मासा नामानि तत्र पर्वे विशिष्टे मासे यथा स्यात् । ग्रन्थे नक मासे पौष्यां पौर्णमास्यां निवृत्तिर्मासादित्यपदेशभाजि पौषशब्दो माभू-
दित्येवमर्थमित्यर्थः कसेन्नं इकारोच्चारणसामर्थ्यादिति यदा कशब्दस्य कारस्तदायं परिहारः । यदा तु किमो मसे कारस्तदा लोपे पिकायमिति सिध्यति य-
द्यपि कशब्दस्ये त्वेवं ते परत्वाद् ध्याल्लोपो वा ध्यते यथा श्री देवता ऽस्य स्यायमिति तथापि परिहारान्तरं सङ्ग्रहाद्देत इद्राष्य कृता नोक्तं अपेति कस्य कारं विप्रतिपत्ता संशयः
अध्वर्युणा होतुः संप्रैषः क्रियते यदि तावदिति किमो विभक्तौ कादेशं कृत्वा कस्येति यदि निर्देशः कृतं इत्यर्थः । किं शब्दस्य प्रश्नाक्षेपयोरिव प्रजापतौ वर्तते अ

=ततश्चेदि दि० अन्यथांतादौ दृश्यर्थविवक्षा चेत्तदा प्रश्नपद्धत्यर्थः ।१=

संवत्सरपर्वणीति च वक्तव्यं स्यात् मत्तकमासे मा भूदिति तर्हि वक्तव्यं न वक्तव्यं इतिकरणः क्रियते ततश्चेद्विवक्षा कसेत्यं यसेति लोपः कस्मा-
न्न भवति इकारोच्चारणसामर्थ्यात् अपयत्कायं हविः कथं तस्य संप्रैषः कर्तव्यः यदि तावत् किमः कादेशः कस्मायं नु ब्रूहीति वक्तव्यं अथ न कि-
मः काया नु ब्रूहीति भवितव्यं यद्यपि किमः अथापि न किमः उभयथा कस्मायानु ब्रूहीति भवितव्यं सर्वस्य हि सर्वनामसंज्ञा क्रियते सर्वश्च
प्रजापतिः प्रजापतिश्च कः । अपर आह । यद्येव किमः अथापि न किमः उभयथा कायानु ब्रूहीति भवितव्यं संज्ञोपसर्जनयोर्हि सर्वनामसं-
ज्ञा प्रतिषिध्यते संज्ञा चैषा तत्रभवतः अपोनप्त्रपांनप्तृभ्यां घः ॥ ॥ ॥

यनेति यदा कशब्दस्यैव कस्येति निर्देश इत्यर्थः सर्वस्येति सर्वार्थवाचिन इत्यर्थः सर्वश्चेति कार्यकारणयोरभेदादिति भावः प्रजापतिश्च क इति सर्वादिषु
कशब्दस्य पाठेऽप्यन्वर्थसंज्ञाविज्ञानात्सर्वनामसंज्ञा भवति गणपाठस्य प्रपञ्चार्थः येषां तु सकलं कृत्स्नमित्यादीनां सर्वनामसंज्ञा नेष्यते तेषां न बहुव्रीहा-
विति सत्रे नेति योगविभागानन्तरभावः । यागसंप्रदाने देवतामन्त्रस्य स स्वार्थः संज्ञा चैषेति यद्येवं कारे शाभावात्कायेति किमो न सिध्यति एवं तर्हि कस्येत्तत ए-
वनिपातनात्कादेशो भविष्यतीत्यदोषः अपो ॥ ॥

भा०कै०४
७७

अथेति वैदेऽक्वचिदपोनप्त्रीस्वाहेति अकारांततः प्रयोगो दृश्यते क्वचिदपोनपादपांनपादितितकारांतः प्रयोग इति प्रश्नः प्रत्ययसन्नियोगेनेति वेदे तु छांदस
त्वात्क्वचिदकारांतप्रयोगः कालेभ्यः कथमिति कालेभ्य इति सकृच्छ्रूवणाद्भवेनवाभिसंबंधः स्यात् सास्य देवेत्यनेन वेति प्रश्नः प्रत्ययमात्रमिति दिगादिभ्यो यदिति

अथ यदपोनप्त्रियं अपांनप्त्रियं वा हविः कथं तस्य प्रैषः अन्नेमं अपोनपातेः नुब्रूहि अपांनपातेः नुब्रूहि० अपोनप्त्रपांनप्तृभावः कस्मान्न भवति
प्रत्ययसन्नियोगे न अकारांतत्वमुच्यते तेनासति प्रत्ययेन भवितव्यं छ च छप्रकरणे पैंगाक्षीपुत्रादिभ्य उपसंख्यानं छप्रकरणे पैंगाक्षीपुत्रा
